।। वैदिकसाहित्ये नारी ।।



श्रीसोमनाथसंस्कृतयुनिवर्सिटी

वेरावलम् - गुजरातम्

।। वैदिकसाहित्ये नारी ।।

प्रेरणास्रोतांसि एवं मार्गदर्शकाः
श्रीकुलपतिवर्याः
प्रो. पङ्कज एल. जानीजीमहाभागाः

लेखकः
डॉ. शत्रुघ्नपाणिग्राही

प्रकाशनम्
श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्
जूनागढजनपदम्, गुजरातम् - ३६२ २६६.
दूरभाषः - ०२८७६ - २४४५२८, २९, ३२ फेक्स : २४४४१७
e-mail : sssu.veraval@gmail.com,
www.shreesomnathsanskrituniversity.info

प्रकाशकः -

डॉ. विष्णुः पुरोहितः
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्
युनिवर्सिटी रोड, वेरावलम् - ३६२ २६५
जुनागढजनपदम् (गुजरात)

प्रथमं संस्करणम् - फरवरी, २०१३
ISBN -13 978-81-925721-7-8

प्रतयः - ३००

मूल्यम् - १००/-

मुद्रकः -
एच. के ओफसेट, वेरावलम्

॥ शुभाशंसनम् ॥

विद्यायाः प्रकाशनं बहुविधं भवति। कदाचित् अध्यापनेन, कदाचित् अध्ययनेन, कदाचित् प्रवचनेन च। परन्तु उपर्युक्ताः प्रकाशनमार्गाः अपेक्षितविद्याप्रकाशनं न कुर्वन्ति यावद्ग्रन्थप्रकाशनं विद्याप्रकाशनं जने-जने करोति। अत एवोक्तम् "पुस्तकी भवति पण्डितः"। अर्थात् यस्य पार्श्वे पुस्तकानि बहूनि विविधानि च भवन्ति स पण्डितो भवति। श्रीसोमनाथसंस्कृतविश्वविद्यालयः एकत्र तु संस्कृतभाषायाः प्रचारप्रसारक्षेत्रे समर्पितकालो वर्तते तदाऽन्यत्र नूतनसाहित्यसर्जनां कारयितुं तस्याश्च प्रकाशनं कारयितुं दत्तावधानोऽस्ति। अस्मिन्नेव शुभे पुण्ये च सन्दर्भे "**स्वर्णिमगुजरातजयन्ती**"-अवसरे तथा बेङ्गलूरुनगरे आयोजितायां '**विश्वसंस्कृतपुस्तकमेलायां**' श्रीसोमनाथसंस्कृतविश्वविद्यालयः बहूनां ग्रन्थानां प्रकाशनं करोति। वैदिकयुगे नारीणां स्थानं अतिवगौरवास्पदम् आसीत्। ऋग्वेदानुशीलनेन ज्ञायते बह्व्यः मन्त्रद्रष्ट्र्यः नार्यः आसन्। आधुनिककालेऽपि नारीभिः कथं वर्तितव्यम् इत्यस्य ज्ञानाय पुस्तकमिदं उपकारकं भविष्यति। अस्य ग्रन्थस्य प्रसाराय अहं शुभाशंसनं प्रकटीकरोमि।

॥ जयतु सोमनाथः जयतु संस्कृतम् ॥

प्रो. पङ्कज एल. जानी

कुलपतिः

॥ पुरोवाचः ॥

अत्यन्तप्रमोदस्यायं विषयोऽस्ति यत् डॉ. शत्रुघ्नपाणिग्राही-प्राध्यापकः वेदविभागीयः यः एकः सुयोग्यः सुशीलः श्रमशीलः आचारश्लक्षणचास्ति। **'वैदिकसाहित्ये नारी'** इति पुस्तकं श्रीसोमनाथसंस्कृतयुनिवर्सिटी द्वारा प्रकाशयति। अत्र ग्रन्थे प्रणीता ये विषयाः सन्ति तेषु वैदिककालीनानां नारीणां विषये शास्त्रप्रमाणेन सह जीवन वृत्तान्तसंकेतेन सह वैदिकसाहित्ये तासां भूमिकाऽपि वर्णिता वर्तते। एतदत्रावधेयमस्ति यत् वैदिककालीनाः नार्यः सुशिक्षिताः,गृहकार्यदक्षाः ब्रह्मवादिन्यः, उद्योग-कर्मणिलीनाः गृहप्रबन्धनकुशलाः, वैदिक-धर्म-परिपालने प्रवीणाः आसन्। डॉ. पाणिग्राही-महोदयेन रचितोऽयं ग्रन्थः मन्ये उपर्युक्तान् सर्वान् सन्दर्भान् स्वगर्भे स्थापयति; येन पाठकानां कृते शोधच्छात्राणाञ्च च कृते रुचिकरो भविष्यति। अत्र ग्रन्थे महता वैदिकपण्डितेन शत्रुघ्नपाणिग्राहीमहोदयेन स्त्रीणां पर्यायवाचकशब्दमाध्यमेन स्त्रियः आधिभौतिकाधिदैविकाध्यात्मिकगुणाः प्रकटीकृताः वर्तन्ते येन

"विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु ।"

इति दुर्गासप्तशतिग्रन्थस्य मन्त्रात्मकः श्लोकः मन्ये व्याख्यातो भवति।

अहमस्य ग्रन्थस्य साफल्यं कामये, तथा चास्मै लेखकाय साधुवादमाशीर्वादं च ददामि।

जयतु सोमनाथः

- प्रो. देवेन्द्रनाथ पाण्डेय
वेदविभागाध्यक्षः

प्रस्तावना

यस्य निःश्वसितं वेदाः यो वेदेभ्योऽखिलं जगत्।

निर्ममं तमहं वन्दे विद्यातीर्थ महेश्वरम्।।

इति सायणवचनानुसारं वेदस्य नित्यत्वं सिद्ध्यति, वेदो भवति सत्यविद्यायाः भारतीयसंस्कृतेश्च आधारस्तम्भः। सच्चिदानन्दरूपस्य वेदस्य मुख्यप्रतिपाद्यसिद्धान्तः जगदुन्नतिः। ''वेदाः सर्वहितार्थाय'' इति स्मृति-वचनात् वेदस्य महत्त्वमवगन्तुं शक्यते। अस्माकं भारतवर्षस्य परिचयः तथा वैदिकयुगीयजनानां विषये च वैदिकसाहित्यमाध्यमेन एव ज्ञानं भवति। प्राचीनवैदिककाले राष्ट्रस्य सामाजिकी व्यवस्था, आचार-विचारः, शिक्षण-प्रशिक्षणं, कर्त्तव्याकर्तव्यं, धर्माधर्मः, संस्कारादिक्षेत्रे नारीणां स्थितिः कीदृशी आसीत् इति विषयोऽयं पुस्तकस्य विचारसारः।

''यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता। भणितीयं वर्तमानकालेऽपि प्रासङ्गिक शाश्वतमनुवाक्यम्। वेद-वेदान्त-उपनिषद्-आरण्यक-ब्राह्मणादिभ्यः ग्रन्थेभ्यः प्रारभ्य रामायण-महाभारत-पुराणादिषुग्रन्थेषु समाजस्य-पुनरुत्थानाय परिवारकल्याणाय च नारीणां महत्त्वं, तासां प्रशंसा च बहुधा वर्णिता। वैदिकयुगे तु पुत्रवत् नारीणामपि उपनयनादि संस्काराः अभवन्निति अथर्ववेदस्य अध्ययनात् ज्ञायते, ऋग्वेदेऽपि विंशतिसंख्याकानां ऋषिकाणां वर्णनं दृश्यते तासु विश्ववारा-सिकता-घोषा-रोमशा-लोपामुद्रा-अपाला-गार्गी-मैत्रेयी-इत्याद्याः प्रमुखाः आसन्। तदा स्त्री गृहिणी-गृहस्वामिनी-सहधर्मिणी इत्यादिभिः विशेषणैः सम्बोध्यते स्म। अपि च वैदिकसाहित्यस्यानुशीलनेन ज्ञायते, वैदिकनार्यः यज्ञकर्मणि मन्त्रपठनार्थं आदिष्टाः आसन्। तदा पुरुषब्रह्मचारीवत् बालिकानामपि विद्याभ्यासः गुरुकूले प्रचलितः आसीत्। वैदिकयुगे स्त्रीच्छत्राणां ब्रह्मवादिन्यः सद्योद्वाहश्च इति भेदेन विभागद्वयमासीत् तत्र ब्रह्मवादिनीनामग्नीन्धनं, वेदाध्ययनं स्वगृहे च भैक्षचर्येति। सद्योद्वाहः स्त्रियः ब्रह्मचर्यात्परं विवाहं कृत्वा गार्हस्थजीवनमभिमण्डयन्ति स्म। अत्र

आधुनिकयुगे नारीणां प्रोत्साहनार्थम् एषः मम लघुप्रायसः वर्त्तते यत् स्त्रियः अपि इदानीं सर्वेषु क्षेत्रेषु अग्रेसराः भवन्त्विति। शोधछात्राणां कृतेऽपि अस्य उपादेयता भविष्यतीति मन्ये।

अस्मिन् सारस्वतकर्मणि प्रेरणामूर्तिभ्यः श्रीसोमनाथसंस्कृतयुनिवर्सिटी इत्यस्य माननीयकुलपतिवर्येभ्यः प्रो. वेम्पटि कुटुम्बशास्त्रिणः जानीजी महाभागेभ्यः हार्दिककृतज्ञतां विज्ञापयामि, येषामपारकरुणया ग्रन्थस्यास्य प्रकाशनं जातम्। पुनश्च श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वेदविभागाध्यक्षेभ्यः गुरुचरणेभ्यः प्रो. देवेन्द्रनाथ-पाण्डेयमहोदयेभ्यः तथा श्रीसोमनाथसंस्कृतयुनिवर्सिटीद्वारासंञ्चालित महाविद्यालयस्य प्राचार्यवर्येभ्यः डॉ. नरेन्द्र एल. पण्ड्यामहोदयेभ्यः धन्यवादं विनिवेदयामि, येषां मार्गदर्शनं मया प्रतिक्षणं प्राप्तम्। उत्कलप्रान्तस्थस्य श्री जगन्नाथ संस्कृतविश्वविद्यालयस्य वेदविभागाध्यक्षेभ्यः गुरुपादेभ्यः डॉ. दिवाकरमहापात्र महाभागेभ्यः तथा श्री जगन्नाथवेदकर्मकाण्डमहाविद्यालयस्य धर्मशास्त्रविभागा-ध्यक्षेभ्यः डॉ. विश्वनाथस्वाईमहोदयेभ्यः कृतज्ञतां ज्ञापयामि।

अन्ते च पित्रोः, सर्वेषां विद्यानुरागिणां, विदुषां, पदाधिकारिणां, अध्यापकमित्राणां च कृते कृतज्ञतां ज्ञापयन् मम दीक्षागुरोः 'श्री श्री अनन्तश्री बाबा महाभागानां करकमलेषु ग्रन्थोऽयं सादरं समर्प्यते।

विदुषां विधेयः
डॉ. शत्रुघ्नपाणिग्राही
अध्यापकः

अनुक्रमणिका

॥ वैदिकसाहित्ये नारी ॥

स्वयम्भुब्रह्माणं विहायास्यां सृष्ट्यां न कोऽपि जीवो वर्त्तते यस्य जन्म नारीसहायतां विना अभूत्। निखिलेऽस्मिन् जगति जनसंख्यादृष्ट्या नारीणां संख्या पुरुषतुलनया प्रायशः न्यूना न भवति। मानवतादृष्ट्या नार्यपि समानाधिकारिणी भवति। अतो मानवसमाजस्य समुन्नतिः सन्निहिता वर्त्तते नारी नरयोः समानप्रगतौ। न कस्मिन्नपि युगे समाजस्योत्कर्षाय नारीणामवहेलना कृता वर्त्तते। किन्तु समयस्य प्रवाहे नारीणां सम्माने उपयोगे चोत्थानं पतनं चावलोक्यते। ज्ञानमार्गे विकाशशीलजातिष्वाद्या आर्यजातिर्भवति। आर्यसभ्यतायां नारीणां स्थानं कीदृशमासीत् तज्ज्ञातुं तत्कालीनसाहित्यस्यानुशीलनमावश्यकम्। वेदादारभ्य लौकिकसाहित्यं यावत् रचितेषु ग्रन्थेषु सर्वत्र सामाजिकार्थिकराजनैतिक-स्थितीनां स्वरूपं ज्ञातुं शक्यते।

वैदिकऋषिकाः -

सम्पूर्णवैदिकइतिहासे ऋषिकाणां सख्यरूपं दृश्यते। यतो हि अनेकेषु स्थलेषु उद्धरितानां ऋषिकाणां महत्त्वपूर्णम् आख्यानं दृश्यते।

ऋषिका स्त्रीलिङ्गात्मकशब्दः। यजुर्वेदे उल्लेखितोऽस्ति -

"सहस्तोमाः सहच्छन्दस आवृतः सहप्रमा ऋषयः सप्तदैव्याः।"[१]

अर्थात् यः वेदस्य प्रवचनकर्त्ता, वेदनिष्ठः ब्रह्मचर्यादितपसाधनायां व्रती प्राज्ञः, पञ्चज्ञानेन्द्रियेषु तथा मनसि पवित्रः स ऋषिपदवाच्यः। मुण्डकोपनिषदि ऋषेः लक्षणं महात्म्यं च एतादृशं वर्णितमस्ति यत् -

"संप्राप्यैनमृषयो ज्ञानतृप्ताः कृतात्मानो वीतरागाः प्रशान्ताः।
तेसर्वगं सर्वतः प्राप्य धीरा युक्तात्मानः सर्वमेवाविशन्ति॥"(२) इति

यः परदुःखेन दुःखी, निःस्वः तथा अज्ञानीनां सेवायां सदा स्वयं समर्पितं करोति तं महामानवं महात्मानं वा सर्वे कथयन्ति। परन्तु ऋषयः कालदर्शिनः भवन्ति। सृष्ट्या साकं संपृक्तं परमात्मानं सर्वदा ते अनुभवकर्त्तुं शक्नुवन्ति। ते वेदमन्त्राणामर्थमुपलब्धं

कृत्वा समाजस्य हिताय प्रचारं कुर्वन्ति। अतः निरुक्त कर्त्ता यास्कमुनिः कथयति यत् -

"साक्षात्कृतधर्माण ऋषयो बभूवुः।
तेऽवरेभ्योऽसाक्षात्कृतधर्मस्य उपदेशेन मन्त्रान् सम्प्रादुः।" (३)

एतस्मात् ज्ञायते ऋषयः न तु वेदमन्त्राणां रचयितारः। ते स्वकीय तपस्याध्यानबलेन च अन्तःकरणे वेदमन्त्राणां दर्शनं कृतवन्तः। 'ऋषि दर्षनात्' इति आचार्य यास्केन प्रतिपादितम्।

तस्मात् चतुर्णां वेदानां प्रत्येकसूक्तस्य प्रागैव ऋषि-देवता-छन्दसां नाम दृष्टिगोचरं भवति। वेदमन्त्रेषु स्थितानामक्षराणां संख्यानुसारेण मन्त्राणां छन्दः नामितं भवति। मन्त्रेषु यस्य देवस्य सङ्केतो वर्त्तते स एव तस्य मन्त्रस्य देवता। देवता भवति मन्त्राणां प्रतिपाद्यवस्तुः। तद्वत् ये तपस्विनः सूक्तम् अथवा सूक्तमध्येस्थितं मन्त्रार्थं सर्वप्रथमतया जनानां कल्याणाय व्याख्यानं कृतवन्तः तेषां मन्त्राणां ते ऋषयो भवन्ति।

ऋषेः इव ऋग्वेदे चतुर्विंशति संख्याकानां ऋषिकाणां नामोल्लेखः दृश्यते। अथर्ववेदेऽपि पञ्च ऋषिकाणां नामानि दृश्यन्ते। वैदिकर्षिकाणां नामानि ताभिः दृष्टमन्त्राणां संख्या निम्नांशे सारिणीरूपेण प्रदर्शिता।

ऋग्वेदर्षिका

	ऋषिका नाम	**मन्त्रसंख्या**
१)	सूर्या सावित्री (१०/८५)	४७
२)	घोषा काक्षीवती (१०/३९-४०)	२८
३)	सिकता निवातरी (९/८६)	२०
४)	इन्द्राणी (१०/८६, १०/१४५)	१७
५)	यमी वैवस्वती (१०/१०, १०/१४५)	११
६)	दक्षिणा प्रजापत्या (१०/१०७)	११
७)	अदितिः (१०/७२, ४/१८७)	१०
८)	वागाम्भृणी (१०/१२५)	१४

९)	अपाला आत्रेयी (८/९१)	७
१०)	जुहू ब्रह्मजाया (१०/१०९)	६
११)	अगस्त्यस्वसा(१०/६०)	७
१२)	विश्ववारा आत्रेयी (१०/१२५)	६
१३)	ऊर्वशी (१०/९५/२१)	६
१४)	सरमा देवशुनी (१०/१०८)	६
१५)	शिखण्डिनौ अप्सरसौ (९/१०४)	६
१६)	पौलमी शची (१०/१४५/१)	६
१७)	देवजामयः इन्द्रमातरः (१०/१५३)	५
१८)	श्रद्धाकामायनी (१०/१४५/१)	५
१९)	नदी (३/३३/४,६,८,१०)	४
२०)	सर्पराज्ञी (१०/१८९)	३
२१)	गोधा (१०/१३४/७१)	१
२२)	शाश्वती आङ्गिरसी (८/१/३४)	१
२३)	वसुक्र पत्नी (१८/२८/१)	१
२४)	रोमशा ब्रह्मवादिनी (ऋ. १/१२६/१)	१
	सम्पूर्णमन्त्राः	२२३

अथर्ववेद ऋषिका

	ऋषिका नाम	**मन्त्रसंख्या**
१)	सूर्या सावित्री (१४/१,२)	१३९
२)	मातृनामा (२/२, ४/२०, ८/६)	४०

३)	इन्द्राणी (२०/१२६)	११
४)	सर्पराज्ञी (२०/४८, ४-६)	३
५)	देवजामयः (२०/९३, ४-८)	५
	सम्पूर्णमन्त्राः	१९८

वेदमन्त्राणां गूढार्थं हृदयङ्गमं कृत्वा सर्वेषां जनानामुपकाराय व्याख्यानं कृतवत्यानां ऋषिकाणामेका सारिणी वृहद्देवतायाः चतुर्विंशतितम अध्याये उल्लिखिता वर्त्तते। यथा

घोषा गोधा विश्ववारा अपालोपनिषन्निषत्।
ब्रह्मजाया जुहूर्नाम अगस्त्यस्य स्वसादितिः ।।८४

इन्द्राणी चेन्द्रमाता च सरमा रोमशोर्वशी।
लोपामुद्रा च नद्यश्च यमी नारी च शश्वती ।।८५

श्रीलक्ष्मीः सर्पराज्ञी वाक् श्रद्धा मेधा च दक्षिण।
रात्री सूर्या च सावित्री ब्रह्मवादिन्य ईरिताः ।।८६

अतः सम्पूर्णवैदिकसाहित्येतिहासे ऋषिकाणां साख्यरूपं दृश्यते। अपि च अनेकेषु स्थलेषु उद्धरितानाम् ऋषिकाणां महत्त्वपूर्णम् आख्यानं प्राप्यते।

१. वैदिकऋषिका देवसम्राज्ञी शची -

शची देवराज इन्द्रस्य पत्नी भवति। इयमपि भगवत्याः आद्याशक्त्याः एका कला इति स्वीक्रियते। सा च स्वयंवरस्य अधिष्ठात्री देवी इति कथ्यते। प्राचीनकाले यत्रकुत्र स्वयंवरमभूत् तत्र प्रथमतया शच्याः आवहनम् एवं विधिवत् पूजनं कृतमासीत्। अनया पूजया स्वयंवरसभायां किमपि विघ्न-उत्पात-कलहोपद्रवादि न भवेदिति विश्वासः आसीत्। ऋग्वेदे एतादृशानि अनेकानि सूक्तानि मिलन्ति यानि शचिना प्रकाशितानि। एतानि सपत्नीप्रभुत्वं स्थापितुम् अनुष्ठानोपयोगी सूक्तानि भवन्ति। शची देवी पतिव्रता स्त्रीषु श्रेष्ठा आसीत्। सा भोगविलासमयस्वर्गस्य साम्राज्ञी भूत्वापि सतित्वसाधनायां व्रती आसीत्। अस्याः मनसः उपरि पत्याः विलासी जीवनस्य विपरीतप्रभावो नापतत्।

इयं स्वमात्मानं पश्यति, तथा साध्वीनां देवीनां पुण्यमार्गेण अग्रसरा भवति। अस्याः सर्वस्वभूतः भवति देवराजः इन्द्रः। इन्द्रं विहाय कस्यापि पुरुषान्तरस्य कदाचित् समादरं

न कुरुते। यद्यपि शचीदेव्याः जन्म दानवकूले अभवत्, तथापि इयं त्यागेन तपसा संयमादिभिश्च सद्गुणैः देवैरपि वन्दनीया अभूत्। अस्याः पितुः नाम पुलोमा। असौ पुलोमा दानवकूलस्य सम्मानितः वीरः आसीत्। अस्याः नामानुसारं शची 'पैलोमि' तथा 'पुलोमजा' इत्यपि कथ्यते। वाल्यकाले शची भगवन्तं शङ्करं प्रसादयितुम् उग्रतपस्यां कृतवती। भगवतः शङ्करस्य वरदानेन इयं देवराजस्य प्रियतमा पत्नीत्वेन स्वर्गराज्ये विराजिताभूत्। शची तत्र सुखमयं जीवनं यापयति स्म। एवंप्रकारेण बहुयुगाः व्यतीताः। स्वर्गस्य देवः भवतु, मर्त्यस्य मनुष्यो वा भवतु, कदाचित् दुःखस्यावसरः प्रत्येकस्य कृतेऽपि समायाति। सुखमयं जीवनं दुःखाभिभूतं भवति। दुःखप्राप्त्या प्राणी सतर्कतामवलम्ब्य निजत्रुटि संशोधनाय अवसरं प्राप्नोति। संसारे प्रायः सर्वे दुःखसमये भगवन्तं स्मरन्ति। दुःखसमये एव धर्मस्य महत्त्वं बोध्यते। शच्याः जीवने एतादृशः अवसरः आगतः, यदा तया सतीत्वस्य अग्निपरीक्षा प्रदत्ता। तत्रापि शची सगौरवं सधैर्यं च स्वसतीत्वस्य रक्षां कृतवतीति प्रमाणितम्।

२. वाचक्नवी गार्गी -

वैदिकवाङ्मये नारीणां विषये वर्णितेषु आख्यानेषु ब्रह्मवादिनी विदुषी गार्गी अत्यन्तं प्रसिद्धा। अस्याः पितुः नाम वचक्नु आसीत्। अतः गार्ग्याः नाम 'वाचक्नवी' इति जातम्। गर्गगोत्रे समुत्पन्नत्वात् 'गार्गी' इति नाम लोके प्रचलितम्। किन्तु अस्याः मूलं वास्तविकं नाम किमिति वर्णनं पर्याप्तरूपेण न प्राप्यते। बृहदारण्यकोपनिषदि तु अस्याः शास्त्रार्थप्रसङ्गे समीचीनं वर्णनं प्राप्यते। यथा -

''अथ हैनं गार्गी वाचक्नवी पप्रच्छ याज्ञवल्क्येति होवाच यदिदं सर्वमस्वो तञ्च प्रोतञ्च कस्मिन्नु स्वल्वाप ओताश्च प्रोताश्चेति वायौ गार्गीति कस्मिन्नु खलु.........
देवतामतिपृच्छसि गार्गि मतिप्राक्षीरिति ततो ह गार्गी वाचक्नव्युपरराम॥''(५)

३. ब्रह्मवादिनी ममता -

ममता दीर्घतमा ऋषेः माता आसीत्। इयं ब्रह्मज्ञानसम्पन्ना विदुषी अभवत्। ऋग्वेदसंहितायां प्रथमे मण्डले दशमसूक्ते अग्निविषये अस्याः स्तुतिः लभ्यते। यस्यार्थः भवति- ''हे दीप्तिमन्! असंख्यशिखावान् देवानामावाहक अग्ने! अपरस्य अग्नेः साहाय्येन प्रकाशितो भूत्वा भवान् इदं मानवस्तोत्रं शृणोतु। श्रोतृगणः ममता इव अग्न्युद्देश्येन इदं

मनोहरस्त्रोत्रं पवित्रधृतमिव समर्पयेति'' इति। ऐतरेयब्राह्मणेऽपि अस्याः विषये उल्लेखो वर्त्तते। यथा - ''एतेन ह वा ऐन्द्रेण महाभिषेकेन दीर्घतमा मामतेयो भरत दौष्पन्तिमभिषिषेच।''[६]

४. ब्रह्मवादिनी विश्ववारा -

ऋग्वेदान्तर्गतपञ्चममण्डलस्य द्वितीयानुवाके अष्टाविंशतिसूक्ते विदुष्याः विश्ववारायाः उल्लेखः अस्ति। इयं विश्ववारा अत्रिमहर्षेः वंशे उत्पन्ना विदुषी जाता। इयं तपस्याबलेन ऋषिपदं प्राप्तवतीति ज्ञायते अनया दृष्टानां मन्त्राणां पर्यालोचनेन ज्ञायते; यत् इयमग्नेःउपासिका आसीत्। तत्र वर्णितानां षणां मन्त्राणामर्थः भवति यत्-स्त्रियः सावधानतया अतिथिसत्कारं कुर्युः। यज्ञार्थमपेक्षितां हविषां सामग्रीं च प्रस्तूय स्वकीय अग्निहोत्रिपत्युः समीपे प्रापयेयुः। अग्निदेवस्य वन्दनाकरणीया तथा सावधानतया अग्नेः सुरक्षा च कर्त्तव्या। यदुक्तं यजुर्वेदसर्वानुक्रमण्यां- 'अग्नेशर्द्धात्रिदुहिता विश्ववारा''।

५. अपाला ब्रह्मवादिनी -

इयं ब्रह्मवादिनी अपाला अत्रिमुनेः वंशे समुत्पन्ना। कथ्यते यत् अपाला कुष्ठरोगाक्रान्ता आसीत्। अतः अस्याः पतिः इमां गृहात् बहिष्कृतवान्। दुःखितेयं कुष्ठरोगात् मुक्त्यर्थम् इन्द्रस्य आराधनां चकार। एकदा स्वगृहं प्रति इन्द्रम् आहूय सोमपानेन तृप्तवती। इन्द्रदेवोऽपि प्रसन्नः सन् तस्यै वरं ददौ। अनेन वरदानेन अपालायाः पितुः शिरसि नष्टाः केशाः पुनः जाताः, कृषिक्षेत्रं सुसम्पन्नं अपाला च कुष्ठरोगात् मुक्ता। ब्रह्मवादिनी इयं ऋग्वेदस्य अष्टममण्डलस्य ९१ सूक्तस्य प्रथमतः सप्तमपर्यन्तानाम् ऋचां सङ्कलनं चकार। यथा -

खे रथस्य खेऽनशः खे युगस्य शतक्रतो।
अपालामिन्द्र त्रिस्पूत्यकृणोः सूर्यत्वचम् ।। इति।।

६. ब्रह्मवादिनी घोषा -

इयं ब्रह्मवादिनी कक्षीवतः ऋषेः कन्या आसीत्। बाल्यकाले अस्याः कुष्ठरोगकारणात् विवाहः नाभवत्। अश्विनीकुमारयोः कृपया रोगमुक्तेः परमियं विवाहं कृतवती। इयं विदुषी तथा ब्रह्मवादिनी आसीत्। ब्रह्मचारिणीरूपेण कन्यायाः समस्तं कर्त्तव्यं सूक्तद्वये इयमुल्लिखति। ऋग्वेदस्य दशममण्डलस्य ३९ तः ४१ सूक्तेषु सुन्दरमाख्यानं

प्राप्यते। अत्र पतिगृहे सर्वविधसुखप्राप्तये अश्विनीकुमारयोः आशीर्वादः प्रार्थितः। यथा -

युवां ह घोषा पर्यश्विना यती राज्ञ ऊचे दुहिता पुच्छे वां नरा।
भूतं मे अह्न उत भूतमक्तवेऽश्वावते रथिने शक्तमर्वते॥ इति॥ (१०/४०/५)

७. ब्रह्मवादिनी सूर्या -

ऋग्वेदस्य दशममण्डलान्तर्गत८५ सूक्तस्य ४७ ऋचः अनया दृष्टाः। सूक्तमिदं विवाहसम्बन्धे वर्त्तते। एतेषु मन्त्रेषु उदाहरणरूपेण एकः मन्त्र यथा -

समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ।
सं मातरिश्वा सं धाता समुदेष्ट्री दधातु नौ॥

प्रारम्भे चन्द्रेण सह सूर्यकन्यायाः सूर्यायाः विवाहः वर्णितः। चन्द्रेण सह सूर्यायाः विवाहस्य आध्यात्मिकोऽर्थः तथा ऐतिहासिकं तथ्यमपि वर्त्तते। यत्र चन्द्रसूर्यौ नक्षत्ररूपेण गृह्येते तत्र आलङ्कारिकभाषायाम् आध्यात्मिकवर्णनं कृतम्। यत्र च इयम् अधिष्ठात्री देवतारूपेण वर्णिता तत्र प्रत्यक्षतः तथैव व्यवहारः प्रवर्त्तते। सूर्यायाः कृते विवाहसमये तस्याः पितुः उपदेश अतीव मार्मिकः। बधूरूपेण उत्तमव्यवहारद्वारा श्वशुरालये सर्वान् वशीभूतान् कर्त्तुं कथिमस्ति। यथा -

साम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु॥[७]

८. ब्रह्मवादिनी वाक् -

अम्भृणऋषेः कन्या वाक् प्रसिद्धा ब्रह्मज्ञानिनी आसीत्। इयं भगवत्याः देव्याः अभिन्नतां प्राप्तवती। ऋग्वेदसंहितायाः दशममण्डलस्य १२५ तम सूक्ते 'देवीसूक्तम्' इति नाम्ना ये अष्टौ मन्त्राः प्राप्यन्ते, ते अनया दृष्टाः सन्ति। भारतीयपूजापरम्परानुसारं चण्डीपाठेन समम् एतेषां मन्त्राणां पठनं महत्त्वपूर्णं मन्यते। एतेषु मन्त्रेषु स्पष्टतया अद्वैतवादस्य सिद्धान्तः प्रतिपादितः। 'महाभाग्यात् देवताया एक आत्मा बहुधास्तूपते' इति निरुक्तकारस्य वचनमत्र स्पष्टं प्रतिफलितं भवाति। वाक् देव्याः सर्वदेवत्वं सर्वव्यापकत्वं च सिध्यते। यथा -

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा॥इति॥

९. रोमषा -

रोमषा ऋग्वेदस्य एका ऋच एवं सामवेदस्य अनेकान् मन्त्रान् दृष्टवती। बृहद्देवताकारः[८] इमांरोमषां भावदेवस्य पत्नी तथा बृहस्पतेः पुत्रीरूपेण स्वीकृतवान्। यथा - ''प्रादात् सुतां रोमशानाम नाम्ना बृहस्पतिर्भावदव्यस्य राज्ञे''[९] इति।

१०. ब्रह्मवादिनी सर्पराज्ञी -

मन्त्रत्रयविशिष्टस्य ऋग्वेदीय १८९ सूक्तस्य ऋषिका भवति सर्पराज्ञी। अस्मिन् सूक्ते उपमा दरीदृश्यते। शिशुः मातृक्रोडे विराजितः अपि आकाशे असंख्यलोकलोकान्तरनियन्त्रकस्य सुरक्षाबलये तिष्ठति। यथा बालकः सम्मानप्रदर्शनपूर्वकं गुरुं पितरं वा प्रदक्षिणी करोति तथा क्षुद्रं क्षुद्रम् आकाशीय पिण्डं बृहत् बृहत् पिण्डं परिक्रामति यथा सूर्यः मासस्य त्रिंशत् दिनानि प्रकाशयति तथैव आत्मा शरीरस्य त्रिंशत् धामानि उज्जीवितानि करोति। अस्मिन् सूक्ते अयमेव आशयः प्रतिभाति। यथा-

त्रिंशद्धाम वि राजति वाक्पतङ्गायधीयत। प्रति वस्तो रह द्युभिः॥ इति॥

ऐतरेयब्राह्मणे अस्या सम्बन्धे एका कथा अपि समुपलभ्यते।[९] बृहद्देवतायां सर्पराज्ञाः नामोल्लेखः अनेन प्रकारेण दृश्यते। यथा- ''श्रीताक्षी सर्पराज्ञी वाक् श्रद्धा मेधा च दक्षिणा।''[१०] इति ''सर्पराज्ञी नाम ब्रह्मवादिनी''[११] इति।

११. श्रद्धाकामायनी -

कामगोत्रे उत्पन्ना श्रद्धानाम्नी ऋषिका ऋग्वेदस्य[१२] अस्य निर्दिष्टसूक्तस्य व्याख्यात्री। अस्मिन् सूक्ते श्रद्धायाः महत्त्वं प्रतिपादितम्। 'अस्माकं सर्वाणि कर्माणि श्रद्धायुक्तानि भवन्तु। अस्माकमध्ययनमध्यापनं श्रद्धायुक्तं भवतु। अस्माकं वाणी श्रद्धापूर्णा भवतु। हे याज्ञिक ! श्रद्धया अग्निहोत्रं-होतव्यं दानकाले श्रद्धापूर्णहृदयेन दातव्यम्। श्रद्धायुक्तः भूत्वा उपासनां कुरु। प्रातः मध्याह्ने सायंकाले च आह्वयन् हृदये श्रद्धां स्थापय'' इत्यादि अस्मिन् सूक्ते श्रूयते। यथा -

श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः।
श्रद्धां भगस्य मूर्धनि वचसो वेदयामसि॥

१२. लोपामुद्रा -

वैदिकवाङ्मये सुप्रतिष्ठितानां नारीणां मध्ये लोपामुद्रा महत्त्वपूर्णस्थानमलङ्करोति। ऋग्वेद मन्त्रषट्कविशिष्टस्य सूक्तस्य[१३] ऋषिका लोपामुद्रा। अस्मिन् सूक्ते आदर्शदम्पती विषये व्याख्यानं विहितमस्ति। जितेन्द्रियः सुशिक्षितः ब्रह्मचारी यथायोग्यां ब्रह्मचारिणीम् उद्वहेत्। तौ मिथ्याचारव्यभिचारेभ्यः बहिः तिष्ठेताम्। धैर्य-क्षमा-सत्य-प्रभुतिगुणान् आचरेयाताम् इत्यादि अस्मिन् सूक्ते चर्चितम् यथा -

पूर्वीरहं शरदः शश्रमाणा·देषा वस्तोरुषसो जरयन्तीः।
मिनाति श्रियं जरिमा तनूनामप्यू नु पत्नीर्वृषणो जगम्युः॥ इति ॥

एषा महर्षि अगस्तेः पत्नी आसीत्। आचार्यसायणः तस्याः ऋषित्वं प्रमाणितकर्त्तुम् उक्तं यत् - "अत्र त्रयाणां बृहमूचा लोपामुद्रागस्त्यशिष्यैदृष्टत्वात् त एवर्षयः।" इति।

१३. ऋषिका इन्द्राणी -

मन्त्रषट्क विशिष्टस्य ऋग्वेदीय[१४] सूक्तस्य ऋषिका इन्द्राणी। अस्मिन् सूक्ते एका ब्रह्मचारिणी कथयति। पापं यथा दग्धं भवेत् तदर्थं मया सङ्कल्पः क्रियते। सौभाग्यवती अहं सदाचारिणं पतिं लभेयम्, आनन्दमयं प्रभुं ध्यात्वा अहम् अविद्यां दुरीकुर्याम् इत्यादि। नारीशक्तेः असाधारणीयता अत्र प्रतिभाति। यथा -

इमां स्वनामोषधिं वीरूधं बलवत्तमाम्।
यया सपत्नीं बाधते यया संविन्दते पतिम्॥ इति ॥

-(ऋ. वे. १०/१४५/१)

इन्द्रणीमासु नारिषु सुभगामहमम्।
नह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः॥

ऋ. वे. १०/८६/११

१४. दक्षिणा -

एकादशमन्त्रविशिष्टस्य ऋग्वेदीय[१५] सूक्तस्य ऋषिका दक्षिणा। अस्मिन् सूक्ते तया व्याख्यातं यत् प्रभुः सर्वदाता। ज्ञानीव्यक्तिः एतद्ज्ञात्वा अज्ञानं ज्ञानं शिक्षयेत्। सम्पन्नव्यक्तिः निरन्नाय अन्नं ददातु। दानशीलव्यक्तिः आकाशे अप्सरा इव सुन्दरी सम्मानिता च भवतु। इत्यादि अत्र आलोच्यते। यथा -

आविरभून्महि माघोनमेषां विश्वं जीवं तमसो निरमोचि।
महि ज्योतिः पितृभिर्दत्तमागादुरुः पन्था दक्षिणाया अदर्शि ॥ इति॥

- ऋ. वे. १०/१०७/१

१५. शश्वती -

आङ्गिरसः पत्नी शश्वती ऋग्वेदीय[१६] सूक्तस्य ऋषिका भवति। अस्मिन् मन्त्रे व्याख्यातं यत् आत्मनः शरीरं दृश्यमानम्। आत्मा देहमाश्रित्य तिष्ठति। बुद्धिः तस्य आत्मनः सहयोगिनी। सा आत्मानं सम्बोधयति - हे स्वामिन् ! त्वं सुखदायक देहसदनस्य धारणं पोषणं च कुरु। यथा -

अन्वस्य स्थूरं ददृशे पुरुस्तादनस्थ ऊरुरवरम्ब माणः।
शश्वती नार्यभियक्ष्याह सुभद्रमर्य भोजनं बिभर्षि॥

-ऋ. वे. ८/१/३४

१६. अहल्या -

वैदिककाले प्रसिद्धासु ऋषिकाषु अहल्या अन्यतमा। यद्यपि ऋषिकारूपेण तस्याः नाम न श्रूयते तथापि शतपथब्राह्मणे सोमयागप्रकरणे इन्द्रदेवं लक्ष्यीकृत्य अहल्यायाः उपपति आगच्छ इति आवाहनं मिलति।[१७] अत एव अहल्या प्रसिद्धिं प्राप्ता। जैमिनीयब्राह्मणे[१८] षड्विंशब्राह्मणे[१९] च अहल्यायाः नाम श्रूयते। अनन्तरकालेऽपि रचितासु कृतिषु अहल्यायाः नाम प्राप्यते। एतेभ्यः सर्वेभ्यः न केवलं रामायणकालेऽपि अहल्याप्रसङ्गः आलोचितः इति प्राप्यते।[२०]

१७. अदितिः -

अदितिः यद्यपि ऋषिकारूपेण न तावत् प्रसिद्धा तथापि आदित्यस्य मातृरूपेण तस्याः चर्चा वैदिकवाङ्मये प्राप्यते। विशेषतः शतपथब्राह्मणे अदितिदेवतायाः नाम श्रूयते।[२१] अदितिशब्दस्य निर्वचनम् अपि शतपथब्राह्मणे सुस्पष्टमुपलभ्यते। यास्ककृतनिरुक्तग्रन्थेऽपि 'अदितिरदीना देवमाता'[२२] इत्यादि प्रोक्तम्। ऋग्वेदस्य दशममण्डले अदितिदेवतायाः चर्चा प्राप्यते। अनन्तरं रामायणकाले अदितिः देवीरूपेण प्रतिपादिता या खलु इन्द्रस्य माता आसीत्।[२३] आख्यानानुसारम् अदितिः कश्यपमहर्षेः पत्नी आसीत्। तथा तदानीन्तनसामाजिकविध्यनुसारं कश्यपेन सह विवाहः कृतः। अदितेः गर्भात् जातानि

सन्तानानि देवाः, अदितेः सपत्नी दिति गर्भात्दैत्याश्च जाता इति। तैत्तरीयब्राह्मणे अदितेः पुत्रसम्बन्धे चर्चा समुपलभ्यते।[२४] शतपथब्राह्मणे अपि अदितिविषयिणी चर्चा प्राप्यते।

१८. अम्बिका -

शतपथब्राह्मणे अम्बिका रुद्रस्य भगिनीरूपेण प्रसिध्यति। त्र्यम्बकयज्ञे रुद्रं लक्ष्यीकृत्य उच्चार्यमाणे मन्त्रे अम्बिकायाः नाम श्रूयते यथा - एष ते रूद्र भागः सहस्वस्राऽम्बिकयातंजुषष्व स्वाहैष ते रुद्रभाग आखुस्ते पशुः।। इति।।[२५] अम्बिका भाग्याधिष्ठात्री देवी इति। अनन्तरं महाभारतकाले अम्बिका विचित्रवीर्यस्य पत्नी धृतराष्ट्रस्य माता च आसीत्।

१९. कयाधुः -

स्वर्गस्थितासु अप्सरस्सु कयाधुः अन्यतमा। इयं राक्षसी अथवा देवी आसीदित्यस्मिन् प्रसङ्गे ब्राह्मणग्रन्थेषु चर्चा नोपलभ्यते। तैतिरीयब्राह्मणे श्रूयते यत् कयाध्वः पुत्र आसीत् प्रह्लादः। तेन स्वपुत्रविरोचनः क्रोधवशात् पृथिव्यां क्षेपितः, यतः तत् पतनात् गर्त्तः सञ्जातः।[२६] आचार्यसायणः हिरण्यकशीपुनामधेयस्य राक्षसस्य पत्नी कयाधुः आसीदिति प्रतिपादयति। अनन्तरकाले कोषग्रन्थेषु इयं दानवीरूपेण प्रसिध्यति। पौराणिकसन्दर्भेष्वपि इयं राक्षसपत्नी आसीत् इति परिचयः प्राप्यते।[२७]

२०. दीर्घजिह्वी -

लम्बायमानजिह्वाविशिष्टासुरी दीर्घजिह्वी इति ब्राह्मणग्रन्थेषु परिचिता भवति। ऐतरेयब्राह्मणे श्रूयते यत् दीर्घजिह्वी नाम्नी एका राक्षसी प्रातःकाले देवतानां प्रातःसवनकालीन द्रव्यं भक्षितवती। तस्मात् तस्याः परिहारार्थं देवैः विचारः कृतः। अनन्तरं मित्रं वरुणं च देवं लक्ष्यीकृत्य तैः सम्बोधितौ। 'हे मित्रावरुणौ ! यूयं प्रातः सवनमिदं दोषरहितं कुरुतम्।[२८] ताण्ड्यब्राह्मणेऽपि दीर्घजिह्वीसम्बन्धिनी चर्चा समुपलभ्यते।[२९] जैमिनीयब्राह्मणेऽपि किञ्चित् भिन्नरूपेण दीर्घजिह्वी कथानकमुपस्थाप्यते।[३०]

२१. मनावी -

मनावी मनुपत्नी भवति। अस्याः अपरं नाम मनायी। शतपथब्राह्मणे अस्याः सम्बन्धे चर्चा श्रूयते। कथानकानुसारं- मनोः पार्श्वे एकः वृषभः आसीत्। अयं वृषभः असुराणां विनाशकारी आसीत्। एतद्ज्ञात्वा असुरैः तस्य विनाशनिमित्तं विचारः कृतः। अनन्तरं

मनोः सविधे गतवन्तः। मनोः कारणादनन्तरं स एव वृषभः निष्प्रभः जात इत्यादि। आख्यायिकायां मनोः पत्नी मानवी इति स्पष्टं भवति यथा -

मनोर्ह वाऽऋषभ आस।
सा मनोरेव जायां मानवीं प्रविवेश॥ इति॥ [३१]

२२. मानवी -

मानवी मनोः सन्तानम्। शतपथब्राह्मणेऽस्मिन् प्रसङ्गे तथ्यं श्रूयते। तैत्तिरीयब्राह्मणानुसारं इयं मानवी इडाऽपि भवति। यथा - इडा वै मानवी[३२] शतपथब्राह्मणे अस्याः एकं विशेषणं घृतपदी श्रूयते।[३३] अस्मिन्नपि ब्राह्मणे मनुकृत-यज्ञात् अस्या मानव्याः उत्पत्तिकारणात् इयं एतत्सञ्ज्ञा विशिष्टा जाता इति परिलक्ष्यते। जन्मनः मित्रावरुणाभ्याम् इयमपेक्षिता किन्तु मनुना अस्यां मानवजाति-सृष्टिः कृता। वस्तुगत्या मनुकृते यज्ञे अस्याः मानव्याः देव्याः आहुतिप्रदानसम्पर्कः एव तस्याः जयित्रिकारणं भवति न तु तस्यां गर्भे मनुना मानवजातिः सृष्टा इति।[३४]

२३. मेनका -

शतपथब्राह्मणे[३५] षड्विंशब्राह्मणे[३६] च वृषणष्वस्य पुत्रीरूपेण मेनकायाः नाम श्रूयते। किन्तु परवर्त्तिनीकाले रचितासु साहित्यकृतिषु स्वर्गलोकस्य एका श्रेष्ठा अप्सरा या खलु कश्यपप्राधयोः कन्यासु एका आसीदिति चर्च्यते।[३७] इयं खलु ऊर्णायु इति नामधेयस्य गन्धर्वस्य पत्नी अपि आसीत्। गन्धर्वराजेन विश्वावसुना अस्यां मेनकायां प्रेमद्वरा नाम्नी एका कन्या उत्पादिता। स्थूलकेश इति नामधेयस्य ऋषेः आश्रमपदे प्रेमद्वरां जनयित्वा मेनकया तत्र इयं परित्यक्ता इति महाभारते स्मर्यते। किन्तु तस्याः लावण्यमनुभूय राजा पृषद् मोहितः जातः। यतः तस्मात् औरसात् तस्यां मेनकायां द्रुपद नामधेयः पुत्रः समुत्पन्नः।[३८]

२४. मृगवुः -

मृगवु इति नामधेयस्य व्यक्तिविशेषस्य विशेषतः अस्याः उत्पत्तिसम्बन्धे न किमपि तथ्यं समुपलभ्यते। तस्याः आचार व्यवहारविषयेऽपि पर्याप्तं तथ्यं न मिलति। किन्तु अस्याः 'राम' इति नामधेयः कश्चित् पुत्रः आसीत् येन सकलानि वेदशास्त्राणि अधीतानि। न केवलमधीतेषु तस्य पारङ्गमता परिलक्ष्यते। यथा - 'अयमहमस्मि वो वीर इति होवाच रामो मार्गवेयः'[३९] इति।

२५. सुकन्या -

सुकन्या इति नामधारिणी इयम् अन्वर्थनाम्नी। अस्याः प्रसङ्गे शतपथब्राह्मणे विस्तरशः श्रूयते।[४०] यः खलु सुकन्यायाः चारित्रिकविशेषतां गुणान् च विचारयति। सुकन्यासम्बन्धिनी इयं चर्चा अपि स्पष्टं तथ्यं प्रतिपादयति। स्वार्थपूर्त्तितः राष्ट्रहितसाधनम् अधिकं समञ्जसतया साधनीयम् इति एतच्चरित्रे प्राप्यते। राष्ट्रकल्याणाय इयं सुकन्या कृशकायं जीर्णं पुरुषमुपगता। अस्याः चरित्रं भवति इयं खलु पतिव्रता-तेजस्विनी-धैर्यशीला इत्यादि। अस्याः पातिव्रत्यमेवमासीत् येन खलु इयं स्वकृशकायस्य वृद्धस्य पत्युः युवावस्था साधने समर्था:। यथा -

सा होवाच! न वै सुसर्वाविवस्थो न सुसमृद्धाविवाथ मे पतिं निन्दथ इति तौ होचतुः केनावमसर्वे स्वः केनासमृद्धाविति सा होवाच पतिं नु मे पुनर्युवाणं कुरूतमथ वां वक्ष्यामीति।। इति।।[४१] अतः अस्या सुकन्यायाः महत्त्वं सतीषु स्त्रीषु गण्यते।

अनेन प्रकारेण ब्राह्मणग्रन्थेषु संहितासु च समुपलब्ध विशिष्टनारीणां नामोल्लेखः तासां संज्ञा वैशिष्ट्यं प्रतिपादयति। प्राचीनकाले नारीणाम् इयं स्थितिः अधिकारश्च बहुभिः ऋषिभिः आचार्यैश्च पर्यालोचितः।

वैदिकयुगे नारीशिक्षा

कस्यापि देशस्य समाजस्य वा सांस्कृतिक-बौद्धिक-वैज्ञानिकप्रगतिः तस्य देशस्य समाजस्य वा शैक्षिकस्थित्युपरि आधारिता भवति। शिक्षया समाजस्य व्यक्तित्वस्य निर्माणं भवति। पुनश्च समाजः व्यक्त्युपरि आश्रितो भवति। अत एव समाजस्य विकाशाय एतदावश्यकं भवति यत् प्रत्येकं व्यक्तेः सुगठितविकासः स्यात्। तत्तदा सम्भवो भवति यदा सर्वसाधारणाय उच्चशिक्षायाः सम्यक् प्रबन्धो भवेत्।

नार्याः अधिकारेषु शिक्षाधिकारः अन्यतमः। नारी यदि वैदिकज्ञानेन शिक्षिता न स्यात् तर्हि शृङ्खलित सुशिक्षितसमाजसंघटने तस्याः संपृक्तिः न स्यात्। वैदिककालात् आरभ्य आधुनिककालं यावदपि नारीशिक्षासम्बन्धे बहुत्र उपदेशः प्राप्यते। संस्कृतसाहित्ये विद्याभ्यासनिमित्तं नार्याः विशेषाधिकारः प्रतिपादितः। 'विद्याम् अभ्यसनेनैव प्रसादयितुमर्हसि'[४२] इति रघुवंशे कालिदासवचनं प्रमाणमेव।

अतः पुरुषवत् स्त्रीणां कृतेऽपि शिक्षायाः सम्यक् व्यवस्थायाः आवश्यकता स्वाभाविकी भवति। यतो हि समाजस्य प्रगतये स्त्रियः पुरुषाश्च मिलित्वा उपकुर्वन्ति। प्राचीनभारतवर्षे बहुकालं यावत् पुत्रवत् पुत्रीणां शिक्षाविषये पित्रोः रुचिरासीत्। स्त्रीणां कृते शिक्षाया महती आवश्यकता एतस्मात्कारणात् वर्त्तते यत् ता एव समये प्राप्ते मातरो भवन्ति। यथा मातरो भवन्ति, तथैव तासां सन्ततिर्भवति। यदि मातरोऽशिक्षिताः विद्याशून्याः कर्त्तव्यज्ञानहीनाश्च स्युः तर्हि पुत्राः पुत्र्यश्च तद्वत् अविद्याग्रस्ताः अकुशलाः नीतिहीनाश्च भविष्यन्ति। अतः महानिर्वाणतन्त्रे कथितमस्ति 'कन्याऽप्येवं लालनीया शिक्षणीया प्रयत्नतः' इति। शिक्षया यज्ज्ञानं लभ्यते, तेन एकस्या बुद्धेः शक्तेः कार्यक्षमतायाः च बृद्धिर्भवति। शिक्षिता एव जना देशसेवां, राष्ट्ररक्षां, राष्ट्रसंचालनं, पठनं, पाठनं, गृहस्योत्तमभरणपोषणं विज्ञानस्योन्नतिं च कर्तुं शक्नुवन्ति। यथा पुरुषेभ्यः शिक्षा श्रेयस्करी वर्त्तते, तथैव स्त्रीणां कृतेऽपि शिक्षायाः महत्त्वं वरीवर्ति।

वैदिकयुगे नारीणां शैक्षिकस्थितिः -

प्राचीनभारतीयसभ्यतायाः अवलोकनेन ज्ञायते यत् पुरुषवत् स्त्रियोऽपि उच्चवैदिकशिक्षामलभन्त। शिक्षा नाम वैदिकशिक्षा यथा वेदानां वेदाङ्गानां चाध्ययनं मुख्यरूपेण एव प्रचलितमासीत्। एतदध्ययनं केवलम् उच्चवर्णानां कृते सीमितमिति

निश्चप्रचं प्राचीनसाहित्याध्ययनादेव भाति। तथापि स्त्रीणामध्ययने स्वातन्त्र्यं दत्तमिति केषुचित्स्थलेषु वर्णितमस्ति। तदा यज्ञस्य धार्मिकानुष्ठानस्य महत्त्वमासीत्। कासाञ्चन नारी ऋषीणां वेदाध्ययनं यज्ञकार्यसम्पादनं वेदप्रचारकर्म च जीवनस्य लक्ष्यमासीत्। मैक्डोनाल्डमहोदयानां मतेन विश्ववारा न केवलमेका नारीऋषिः, अपि तु एका ऋत्विक्त्वेन सा खलु बहूनां यज्ञानामाधानमकरोत्। यदुक्तम्[४३] - She was not only a Rsi. composer of RKs, but also a priestess discharging the priestly office, worshipping gods at down with hymns oblations.

नारीशिक्षायाः अनिवार्यतासम्बन्धे अथर्ववेदे श्रूयते यत् - हे नारि ! जीवनयात्रायां विद्यायाः आहरणेन साकं तज्ज्ञानमावश्यकम्। तव अविवेकिवचनमात्रं तदपेतकर्म च क्षणमात्रेण स्वर्गसुखदायकं गृहं विषज्वलितं साधयितुं कारणं स्याताम्। ततः सम्पदि विपदि आधिव्याधिकाले च सर्वदा सावधानतया तिष्ठ। शतं वर्षाणि यावत् संसारेऽस्मिन् स्थित्वा सांसारिकान् गृहस्थान् अप्सरसः भूतगणान् च परितोषय। यथा-

''प्रबुध्यस्व सुबुधा बुध्यमाना दीर्घायुत्वाय शतशारदाय।'

गृहान्गच्छ गृहपत्नी यथासो दीर्घं त आयुः सविता कृणोतु ।। [४४]

इति। न केवलम् अथर्ववेदे ऋग्वेदे चापि कन्यायाः शिक्षासंस्कारसम्बद्धा चर्चा श्रूयते। ऋग्वेदानुसारं कन्या 'शुसंकाशा' इति संज्ञाविशेषणधारिणी। अर्थात् सा उत्तमविद्यया भूषिता आलोकिता च। सा खलु 'मातृमृष्टा' अर्थात् विदुषीमात्रा प्रशिक्षिता परिशुद्धा च। प्रथमतः स्वमातृतः शौचाचारसंसारचालनादिकज्ञानं प्राप्य अनन्तरं सा आचार्यात् उपदेशं स्वीकरोति स्म । ज्ञानाहारणार्थं कन्यानां योग्यता ऋग्वेदे श्रूयते - 'विद्या जलधारा इव तासां कर्णेषु निनादिता भवति।'[४५]

या खलु कमनीया सा कन्या भवतीति निरुक्तस्याभिप्रायः।[४६] ऋग्वेदकन्यायाः शुभाचरणनिमितं शिक्षाव्यवस्था श्रूयते। तदुपदेशानुसारं - 'हे कन्ये ! अधः समीक्ष्य त्वया गन्तव्यम्। ऊर्ध्वम् इतस्ततः दृष्ट्वा यथेच्छभावेन यां काञ्चित् यंकञ्चित् च दृष्ट्वा विचरसि चेत् तत् खलु तव मानसिकचापल्यस्य औद्धत्यस्य च लक्षणं भवेत्। तव उरुद्वयं स्तनद्वयं च अनावृत्तं यथा स्यात् तदर्थं त्वया यत्नः करणीयः। लज्जा विनम्रतां च उभयं तव अमूल्यभूषणम्न। नारी यदि असंयता भवेत् तर्हि मनुष्यसमाजः कामविकारग्रस्तः भवति। येन खलु कलुषितसमाजः जायते।

वेदाध्ययनार्थं ब्रह्मचर्याश्रमे प्रवेशात्पूर्वं यज्ञोपवीतसंस्कारो विधीयते। तदा याः

नार्यः ब्रह्मचारिण्योऽभवन्, तासां च भिन्नभिन्नशाखानुसारमुपनयनं जायते स्म। अतो नार्योऽपि अध्ययनकर्मणि पुरुषवत् सौकर्यं लभन्ते स्म। परन्तु स्वसम्प्रदायानुसारं नारीणां कृते स्वतन्त्रगुरुकुलव्यवस्था नासीत्। ब्रह्मचारिण्यः स्वभ्रातृब्रह्मचारिभिः सहाध्ययनंकुर्वन्त्विति रामायणानुशीलनेन ज्ञातं भवति। उत्तररामचरितानुसारमात्रेयी बाल्मीकेः आश्रमे अधीतवती। भवभूतेः मालतीमाधवनाटके कामन्दकी गुरुकुले अधीतवती। परन्तु एतादृशानि उदाहरणानि नाधिकानि, केवलं गृहेष्वेव कन्याः शिक्षामलभन्तः। २०० ई.पू. यावत् स्त्रियः वेदाध्ययनस्य यज्ञानुष्ठास्याधिकारं प्राप्तवत्यः। तदा पत्न्याः साकमेव पुरुषः यज्ञानुष्ठानं कर्त्तुं समर्थः आसीदिति ज्ञायते। पुनः काशकृत्स्नी मीमांसापुस्तकं लिखितवती। याः छात्राः मीमांसाविषये प्राविण्यं लभन्ते, ताः काशकृत्स्नाः कथ्यन्ते।[४७] याज्ञवल्क्यस्य पत्नाी मैत्रेयी सांसारिकवस्तूनि विहाय प्रचलितदर्शनविषये ज्ञानं प्राप्तुमैच्छत्।[४८] अपरा पत्नी गार्गी जनकराजस्य यज्ञावसरे स्वकीयाध्यात्मिकज्ञानस्य प्रमाणं दत्तवती।[४९] वेदविद्यापारङ्गता स्त्री 'पथ्यास्वस्तिः वाग्' इत्युपाधिना समलंक्रियते स्म, इति कौषीतकि-ब्राह्मणानुशीलनेन ज्ञायते। ईसापूर्व द्वितीयशताब्द्यां जातः पतञ्जलिः महाभाष्ये अनेकत्र पाठकानाम् अध्यापयित्रीणाञ्च स्त्रीणामुल्लेखं करोति। पतञ्जलिः कथयति- ''आपिशल-मधीते ब्राह्मणी आपिशलाब्राह्मणी।' काशकृत्सिना प्रोक्ता मीमांसा काशकृत्स्ना, तामधीते काशकृत्स्नाना ब्राह्मणी।' इति। शिक्षाप्रामुख्येन स्त्रीभ्य एव प्राचीनकाले प्रदीयमाना आसीत्। अत्र प्रमाणत्वेन वात्स्यायनवचः उपस्थाप्यते -

योगज्ञा राजपुत्री च महामात्यसुता तथा।
सहस्रान्तः पुरमपि स्ववशे कुरुते पतिम्॥

तथा पतिवियोगे च व्यसनं दारुणं गता।
देशान्तरेऽपि विद्याभिः सा सुखेनैव जीवति॥ इति।

उपर्युक्तश्लोकाभ्यां विदितं भवति यत् प्रायशः चतुषष्टिकलात्मिकासु विद्यासु स्त्रीणामधिकारः आसीत्।

पुराणकालेष्वपि नार्यः विद्यायां दक्षा आसन्। अस्मिन् प्रसङ्गे राज्ञः दाक्षायणस्य कन्ययोः नाम आगच्छति, ये मीमांसाविषये दर्शनसाहित्ये च दक्षतां प्राप्तवत्यौ।[५०]बुद्धदेवस्यानुमतिं प्राप्य नार्यः विहारेषु तिष्ठन्ति स्म। येन उच्चकुलसम्भूताः कन्याः शिक्षाप्राप्तुं स्ववसरमलभन्त। ब्रह्मचर्यव्रतं धारयन्त्यः बह्वयः नार्यः बौद्धसंघेषु दार्शनिक-धार्मिकज्ञानं प्राप्ववत्यः। भेरीगाथायाः बह्वयः नार्यः निर्वाणं प्राप्तवत्य इति अलतेकरमहाभागाः स्वकीयपुस्तके उल्लिखितन्।[५१] सम्राऽशोकस्य पुत्री संघमित्रा

बौद्धधर्मस्य प्रचारार्थं लङ्कां गतवती। बाणस्तु कादम्बर्यां तपस्विन्या महाश्वेतायाः वर्णने तस्याः शरीरे ब्रह्मसूत्रस्योल्लेखं करोति। अतः ताः स्वेच्छानुसारं ज्ञानं लब्धुं समर्था आसन्। शिक्षाप्राप्तेः सौविध्यं ब्राह्मणक्षत्रियवैश्यानां कन्याः लब्धवत्यः। नारीणां शैक्षिकस्थितिः तथा समीचीनमासीत् यत् एकत्र विदुषीं पुत्रीं कामयमानस्य पितुः वर्णनं दृश्यते।[५२]

अत एव प्राचीनशिक्षेतिहासानुसारं हिन्दुसमाजः नारीशिक्षां प्रति उदार आसीत्। तत्र स्त्रीणां शिक्षा पुरुषवदेव विधीयमानासीत्।

स्मृतिकाले नारीशिक्षा -

मनुस्मृतेः रचनाकाले नारीणां शैक्षिकस्थितौ परिवर्त्तनमागतम्। तासां शिक्षाग्रहणस्याधिकार आसीत्। परन्तु वेदाध्ययनस्य नासीत्।[५३] यद्यपि धर्मसूत्राणां (५०० ई.पू.) समये नारीणामुपनयनस्य महत्त्वं न्यूनं जातं तथापि मनुस्मृतिसमये तस्यौपचारिकमूल्यमासीत्। पुनश्च वेदाध्ययनाद् वञ्चिताः स्त्रियः विवाहसमयं विना अन्यावसरे मन्त्रोच्चारणं नैव कृतवत्यः। तत् परवर्त्तिकाले याज्ञवल्क्य उपनयनस्यौपचारिकता नरीणां कृते नास्तीति उक्त्वा तस्य सर्वथा बहिष्कारं कृतवान्। गर्भाधानात् चूडाकर्म यावत् संस्काराणामावश्यकता कन्यानां कृतेऽस्ति, परन्तु तेष्वसरेषु वैदिकमन्त्रोच्चारणस्य आवश्यकता नास्तीति सः उक्तवान्।[५४] तस्यानुसारं केवलं विवाहसंस्कारः नारीणां कृते वैदिकरीत्या मान्यो भवति। अतः नारीणामुपनयनसंस्कारः स्थगित अभूत्। पुनः उपनयनाभावत् ताः वैदिकशिक्षालाभाय अधिकारिण्यः नाभवन्। वैदिकज्ञानाभावात् ताः नित्यधार्मिककृत्येषु प्रयुक्तानां वैदिकमन्त्राणां विषये अनभिज्ञा अभवन्। परिणामतः, यज्ञानुष्ठानेषु तस्या उपस्थितिः नाममात्रमभूत्। परवर्तिकाले सायणादयः[५५] धर्मप्रवर्त्तकाः धार्मिककार्येषु तस्याः औपचारिकोपस्थितेः आवश्यकता नास्तीति उक्तवन्तः। यद्यपि यमादयः स्मृतिकाराः प्राचीनकाले स्त्रीणामुपनयनं स्वीकृतवन्तः। परन्तु तस्यै तदधिकारं पुनः प्रदातुं नैव चेष्टितवन्तः। अतः उपनयनाभावेऽपि स्त्रीणां शूद्रत्वेन गणना अभूत्।[५६]

राजा अग्निमित्रः गणदत्तस्य हरदत्तस्य च नियुक्तिः नारीणां विशिष्टशिक्षा निमित्तमकरोत्।[५७] कामशास्त्रकारस्य वात्स्यायनस्य मतानुसारं नार्यः चतुः षष्टिकलासु निपुणाः स्युः।[५८] हालः 'गाथासप्तशती' संग्रहे यासां दक्षिणभारतीय कवीनां नामोल्लेखमकरोत्, तासु सप्त नारीकवयः प्रमुखा आसन्।[५९] याः स्त्रियः दीर्घकालं यावत्शिक्षाप्राप्तौ व्यापृता अभवन्, ता शिक्षाक्षेत्रे स्वरचनया गौरवं प्राप्तवत्यः।

शिक्षणव्यवस्थायां नारीणां योगदानम्।

भारतीयशिक्षाव्यवस्थायां संस्कृतेः संरक्षणायाधिकं महत्त्वं दीयते स्म। अतः गर्भधारणसमये उत्तमचरित्राणां गठनाय धर्माचरणं च कर्त्तुं नार्यः उपदिष्टाः आसन्। येन शिशोः मनसि उत्तमप्रभावः पतिष्यति। माता स्वपुत्राय बुद्धिं वस्त्रं निर्मातीति श्रूयते ऋग्वेदे पञ्चममण्डले (५/४७/६) यथा -

वितन्वते धियो अस्मा अपांसि वस्त्रा पुत्राय मातरो वयन्ति।
उपप्रक्षे वृषणो मोदमाना दिवस्पथा वध्वो यन्त्यच्छ॥

अस्माद् बालकस्य बुद्धिवर्धनार्थं मातुरवदानं ज्ञायते। ध्रुवस्य भक्तिमार्गस्य पथप्रदर्शनं तस्य माता अकरोत्।[६०] सत्यं कथयितुं माता कथं प्रवर्तयति स्म, तस्योदाहरणं छान्दोग्योपनिषदि सत्यकेतुः जाबालेः ब्रह्मचर्याश्रमे प्रवेशप्रसङ्गे दृश्यते।[६१] अस्मात् ज्ञायते यत् यदि कोऽपि निम्नकुलसम्भवा स्त्री जबाला इव सत्यं कथयति, तर्हि सा सत्यकाम इव प्रतिभासम्पन्नं पुत्रं प्राप्नोति। ऋतुध्वजस्य पत्नी मदालसा अध्यात्ममार्गे दक्षतां प्राप्य चतुरः पुत्रान् जनयत् ये ऋषयः अभवन्। पुनश्च राज्यस्य आवश्यकतानुसारं पञ्चमं पुत्रं जनितवती, यः शूरवीरः भूत्वा राजा अभवत्। शिवाजी वीरस्य बालमनसि तस्य माता वीरत्वस्य भावनाम् आनयत्। गुरोः रामदासस्य चरित्रनिर्माणे तस्य परिवारस्य प्रभाव आसीत्। यतो हि प्रारम्भिकशिक्षा गृहादेव भवति, अतः मातापितरौ शिक्षितौ स्याताम्। तदा बालिकाः गृहविज्ञानसम्बन्धिज्ञानं मातुः, साहित्यविषयकज्ञानं पितुः, पितृव्याद् वा अलभन्त। अतः स उपनयनात् पूर्वं बालकं स्वव्यवसायविषये साहित्यादिविषये च सामान्यं ज्ञानमददात्। अस्मिन् अवसरे स्त्रियः ज्ञानं प्राप्य बालकाय ज्ञानप्रदाने सहायतामकुर्वन्।

अतः वैदिककालात् इदानीमपि वैदिकज्ञानयुक्ता स्त्रीशिक्षा नितरामपेक्षते। नोचेत् नारीणां समुचितशिक्षाभावात् समाजे ध्वंसलीला यदा कदाचित् सम्भवेत्। अर्जुनेन एतदनुभूय प्रसङ्गेऽस्मिन् विकलतया उक्तः-

''स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः''[६२] इति।

नारीणां संस्काराः

'प्रकृतिपुरुषात्माकं जगत्' 'अग्निषोमात्मकं जगत्' इत्यादिभिः वचनैः ज्ञायते यत् अस्मिन् जगति द्वौ प्रधानपदार्थौ स्तः। अग्निः सोमश्च, अग्निः अत्र सोमस्य भक्षणकर्ता पुरुषविशेषः तथा सोमोऽस्ति अन्नरूपः उपभोग्या स्त्री विशेषः। इत्यत्र उभयोः सम्मेलनेन सृष्टिरियम् जाता। अतः नारी प्रकृतिं बिना पुरुषस्यस्थितिः सोमंबिना अग्नेः स्थितिः, शक्ते बिना लिङ्गस्य स्थितिः तथैव दयनीयं भवति यथा नारीं बिना पुरुषस्य। जङ्गमेषु पुरुष-स्त्रीरूपा सृष्टिः नैरन्तर्येण प्रवर्त्तमाना असारस्यापि संसारस्य साररूपतां संपाद्यमाना विलोक्यते। सर्वशक्तिमान् ब्रह्मा स्वशरीरमेवार्द्धं विभज्य अर्द्धेन च नारी बभूवेति अस्मत् स्मृतिशास्त्रं प्रतिपादयति। यदुक्तं मनुना -

द्विधा कृत्वाऽत्मनो देहमर्धेन पुरुषोऽभवत्।
अर्द्धेन नारी तस्यां च विराजमसृजत् प्रभुः॥[६३] इति।

इत्थं वयं पश्यामः त्यागस्य तपस्यायाः वात्सल्यस्य सत्यवादितायाः औदार्यस्य दाक्षिण्यादीनां संस्कृतिसभ्यतासंरक्षणस्य अतिथिसत्कारादेश्च स्त्री ब्रह्मण एवार्द्धभागः। कथं वा महिलानां संस्कारः पुरुषापेक्षया न्यूना भवेदिति ? अतो मनुजसमाजस्य समुन्नतिः नारीनरयोः समानप्रगतौ सन्निहिता विद्यते। न तस्मिन्नपि युगे समाजस्योत्कर्षाय नारीणामवहेलना कृताऽस्ति। कुत्रचित् नारीणां संम्मानमाधिक्येन वर्णितमस्ति। यदुक्तं मनुना-

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥[६४] इति।

वैदिकसाहित्यस्यानुशीलनेन ज्ञायते यत् वैदिककाले नारीणां स्थानमतीव गौरवास्पदमासीत्। जीवनस्य सर्वेष्वपि क्षेत्रेषु स्त्रीणां भुमिका प्रमुखा आसीत्। संसारधर्मं निर्वोढुं ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-सन्यासाः इति चत्वार आश्रमाः अस्माकं महर्षिभिः निर्द्धारिताः। सन्यासमतिरिच्य त्रिष्वपि आश्रमेषु महिलानां पुरुषवदेव महत्त्वमासीत्। गूढातिगूढविद्याप्रवर्त्तकेष्वपि पुण्यश्लोकानां महिलानामुल्लेखः लभ्यते। गर्भाधानादारभ्य अन्त्येष्टिपर्यन्तं भारतीयसंस्कृतौ क्रियमाणाः सर्वेऽपि संस्काराः पुरुषमहिलानां कृते प्रायशः समानाः। उपनयनसंस्कारविषये यद्यपि धर्मशास्त्रे स्त्रीणामुपेक्षा दृष्टिगोचरी भवति, तथापि

वैदिकसाहित्ये स्त्रीणामुपनयनविधानं स्पष्टं प्रतिपादितमस्ति। अथर्ववेदस्य एकस्मिन् सूक्ते नारीणामुपनयनसंस्कारस्य विषये उल्लेखोऽस्ति।[६५] धर्मसूत्रकाराणां मतानुसारं द्विजात्यर्थं संस्काराणां प्रावधानं स्थिरीकृतम्। तत्र द्विजातिषु ब्राह्मणस्य स्त्री, क्षत्रियस्य स्त्री, वैश्यस्य स्त्री इति सर्वाः चान्तर्भवन्ति। अतः स्पष्टतया वक्तुं शक्यते यत् स्त्रीणामपि संस्कारेषु अधिकारः वर्त्तते। परन्तु तत्र स्त्रीपुरुषयोर्मध्ये संस्कारसंपन्नप्रक्रियाविषये किञ्चिद् वैषम्यं दरीदृश्यते। यथा- विवाहसंस्कारे कन्यानां कृते हि मन्त्रोच्चारणं क्रियते। अवशिष्टसंस्कारेषु तु नारीणां कृते मन्त्रोच्चारणं न क्रियते इति विषये प्रस्तुतं बहुप्रमाणं मनुना याज्ञवल्क्येन च। तथाहि -

अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः।
संस्कारार्थे शरीरस्य यथाकालं यथाक्रमम्॥

वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः।
पतिसेवा गुरौ वासो गृह्यार्थोऽग्निपरिक्रिया॥[६६] इति।

संस्कारे स्त्रीपुरुषाणामधिकारिविचारे केचन विद्वांसः कथयन्ति यत् - विश्वेऽस्मिन् प्रति वस्तु स्वयं पूर्णं शिवं च वर्त्तते। मनुष्यहिताय वस्तूनां निर्माणं यद्यपि भवति तथापि मायापूर्णसंसारे शुभाशुभश्रेण्यां समेषां वस्तूनां वर्गीकरणं जातम्। तथा च विभागोऽयं पात्रापात्रमूलकोऽपि वर्त्तते। उदाहरणतः घृतं शक्तिबर्द्धकं पौष्टिकं खाद्यं वर्त्तते। परन्तु तद् धृतं तु अतिसारज्वरस्य काशरोगिणः कृते च मृत्योः कारणं भवति। अतः शास्त्रकाराः लौकिकप्रक्रियावद् वैदिकप्रक्रियास्वपि नियममिमं स्वीकुर्वन्ति। 'वयं सर्वे अमृतस्य पुत्राः' इति वेदवाक्येन यद्यपि संस्कारेषु मनुष्यमात्रस्यापि अधिकारो वर्त्तते, तथापि व्यावहारिकदृष्ट्या सामाजिकव्यवस्थायाः सुपरिचालनाय अस्मदृषिभिः संस्कारेषु अधिकारिभेदः परिकल्पितः। तत्र केचन संस्काराः पुरषाणां कृते केचन च स्त्रीणां कृते विहिताः। स्त्रीणां संस्कारेण समाजस्य संस्कारोऽपि जायते। संस्कारिताः नार्यः स्वकीयं परिवारं संस्कृत्य समाजसंस्कारे सहायिकाः भवन्ति। अतः नारीणां संस्कारविषये किञ्चिदत्रालोच्यते।

जातकर्मसंस्कारे नारी -

वैदिकसंस्कृतौ जातकर्मसंस्कारेण मातापितरौ स्वसन्तानस्य दीर्घायुष्यं कामयेते। तत्र कन्यापुत्रयोर्भेदः नैव विचार्यते। ऋग्वेदसंहियतायां जात इति शब्दप्रयोगात् जातकर्मसंस्कारविषये ज्ञायते। पुरा महर्षेः भरद्वाजस्य एका पुत्री आसीत्, या तु अप्सरसः गर्भादुत्पन्ना। भरद्वाजेन स्वपुत्र्याः कृते सर्वेषां संस्कारविधीनामायोजनं कृतम्। यथा -

तस्यास्तु जातकर्मादि कृत्वा सर्वं तपोधनः।

नमा चास्याः स कृतवान् भरद्वाजो महामुनिः॥

श्रुतावतीति धर्मात्मा देवर्षिगणसंसदि।

स्वे च तामाश्रमे न्यस्य जगाम हिमवद्वनम्॥[६७] इति।

वैदिकसंस्काराणामध्ययनेन ज्ञायते यत् जातकर्मसंस्कारे स्त्रीपुरुषयो रुभयोः शिशोः समाना रीतिरनुष्ठीयते स्म इति। तत्र यद्यपि पुत्रस्य प्रथममुत्पत्तिः काम्यते तथापि पुत्र्याः उत्पत्तावप्यानन्दोमनुभूयते स्म। यथा पुत्रप्राप्त्या पिता पितृऋणात् मुक्तो, भवति, तथैव पुत्र्याः प्राप्तौ विवाहकाले कन्यादानेन महत्पुण्यमर्ज्जयति।[६८] अतःजातकर्मसंस्कारे नारीणां समानाधिकारः प्रदर्शितः।

नामकरणसंस्कारे नारी -

प्राचीनकाले व्यक्तेः वर्णधर्मानुसारं नामकरणं कृतमासीत्। मनुस्मृत्यनुसारं ब्राह्मणानां नाम मङ्गलसूचकं, क्षत्रियाणां बलयुक्तं, वैश्यानां धनयुक्तं, शूद्राणां जुगुप्सासूचकं चासीत्। नामकरणे स्त्रीणां कृते विशेषतया ध्यानं दीयते स्म। स्त्रीणां नाम आकारान्तम् ईकारान्तं वा अभीष्टमासीत्। मनोरनुसारं स्त्रीणां नामोच्चारेणं सुखकरं सरलं मधुरं स्पष्टं मनोहरं मङ्गलसूचकं दीर्घवर्णान्तिम् आशीर्वादयुक्तं च भवेत्। बालिकानां नाम्नि अक्षराणां विषमसंख्या भवेदिति प्रमाणं भारतीयशास्त्रे प्रदर्शितम्। राज्ञा द्रुपदेन स्वपुत्र्याः कृष्णायाः नामकरणसंस्कारं कारितवान् इति महाभारते दृश्यते।[६९] आश्वलायनगृह्यसूत्रानुसारं कन्यानां नामकरणसंस्कारः मन्त्रोच्चारणं विना भवतीत्युक्तम्। तस्मात् नामकरणसंस्कारे स्त्रीणामपि वैशिष्ट्यं वैदिककाले अङ्गीकृतम्।

निष्क्रमणसंस्कारे नारी -

मनुस्मृतौ याज्ञवल्क्यस्मृतौ च जन्मकालतः चतुर्थमासे शिशोः निष्क्रमणसंस्कारविषये वर्णितमस्ति। व्यासस्मृतौ संस्कारोऽयं सूर्यदर्शननाम्नाऽभिधीयते। अत्रापि पुत्र इव पुत्र्याः समानाधिकारः विद्यते। मानवगृह्यसूत्रानुसारं निम्नमन्त्रेण पिता सूर्योपासनां विधाय शिशोः सूर्यदर्शनं कारयति। यथा-

नमस्तेऽस्तु भगवन् शतरश्मे तमोनुद।

जहि मे देव दौर्भाग्यं सौभाग्येन मां संयोजयस्व॥[७०] इति।

कन्यायाः कृते निष्क्रमणसंस्कारस्यावश्यकता तथैव वर्त्तते, यथा पुत्रसन्तानस्य कृते।

अन्नप्राशनसंस्कारे नारी -

स्मृतिकाराणां मतानुसारं पुत्रस्य पुत्र्या वा जन्मकालतः षष्ठे मासि अन्नप्राशनसंस्कारः कर्त्तव्यः। तत्र वैदिकसंस्कृतौ अन्नप्राशनसंस्कारोऽयं बालकानां बालिकानां कृते क्रियते स्म। तस्मात् बालकानां षष्ठ-अष्टम-दशमादिषु सममासेषु, बालिकानां च सप्तम-नवम-एकादशादिषु विषयममासेषु अन्नप्राशनसंस्कारः श्रेयस्करः मतः। अथर्ववेदसंहितानुसारं शिशोः प्रथमदन्तदर्शने संस्कारोऽयं विहितः।[७१]

चूडाकरणसंस्कारे नारी -

वैदिकसंस्कृतौ चूडाकरणं चौलकर्मसंस्कारो वा शिशोः मातुः गर्भावस्थायां सम्बन्धितानां केशानां पृथक्करणाय विहितः। तत्र प्रथमे तृतीये वा वर्षे संस्कारोऽयं विधीयते। आश्वलायनगृह्यसूत्रानुसारं कन्यकानां चूडाकरणं वैदिकमन्त्रोच्चारणेन विना क्रियते।[७२] मित्रमिश्रः कथयति यत् कन्यायाः अपि चौलकर्म यथारीति भवेदिति। यथा - 'कुमारी चौलोऽपि यथाकुलधर्ममित्यनुवर्त्तते, ततश्च सर्वमुण्डनं शिखाधारणम् अमुण्डनमेव वेति सिद्ध्यति।[७३]

पुनः चूडाकरणसंस्कारे हरितः स्पष्टं कृतवान् यत् -

स्त्रीशूद्रौ शिखां छित्त्वा क्रोधो वैराग्यतोऽपि वा।

प्राजापत्यं प्रकुर्यातां निष्कृतिर्नान्यथा भवेत्।।[७४] इति।

तदेव सर्वेऽपि स्मृतिकाराः जातकर्मतः चूडाकरणसंस्कारं यावत् सर्वत्र कन्यकानां कृते अनिवार्यतामुद्घोषयन्ति।

उपनयनसंस्कारे नारी -

मनुस्मृतेः अनुसारेण द्विजानां यज्ञोपवीतसंस्कारयोग्यता विद्यते। शूद्रः न द्विजातेरन्तर्गतः भवति। गौतमधर्मसूत्रं कथयति-'शूद्रश्चतुर्थो वर्णः एकजातिः'[७५] इति। अतः शूद्राणामुपनयनसंस्कारे अधिकारोऽपि नास्ति। स्त्री तु द्विजातेरन्तर्गता उत शूद्रजातिषु वेति शङ्का जायते। वशिष्ठधर्मसूत्रानुसारेण परमेश्वरः गायत्रीछन्दसः ब्राह्मणानां निर्माणं कृतवान्। त्रिष्टुप्छन्दसः क्षत्रियाणाम्, जगतीछन्दसः वैश्यानां च निर्माणं कृतवान्। शूद्राणां निर्माणं न कस्मादपि छन्दसः जातम्।[७६] अत्रापि स्त्रीपुरुषयोर्मध्ये भेदः न प्रदर्शितः। अथर्ववेदानुसारेण ब्रह्मचर्यमाध्यमेन कन्या योग्यं वरं प्राप्नुयात्। यथाहि - 'ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्।'[७७]

उपनयनानन्तरं बालकः ब्रह्मचारीति उच्यते। बालिकाः अपि ब्रह्मचर्याश्रमे प्रविशन्ति। तात्कालिकवैदिकसमाजे नारीणां द्वैविध्यं दृश्यते। काश्चिद् अध्ययनार्थं कामयन्ते, ताः ब्रह्मवादिन्यः उच्यन्ते। अपराः उपनयनान्तरं गृहस्थधर्ममाचरन्ति, ताः सद्यो वध्वः इति कथ्यन्ते। इत्थं ब्रह्मवादिन्यः अग्निहोत्र-वेदाध्ययन-भिक्षाटनादिकार्यं कुर्वन्ति। सद्यो वध्वः एतत् न कुर्वन्ति। विवाहसमये तासामुपनयनसंस्कारः जायते। अस्मिन् विषये संस्कारमयूखे, स्मृतिचन्द्रिकायां, हारितधर्मसूत्रकथनोपरि च व्याख्यानं यथा - 'यत्तु हारीतेनोक्तं द्विविधा स्त्रियो ब्रह्मवादिन्यः सद्योवध्वश्च। तत्र ब्रह्मवादिनीनामुपनयनयमग्नीन्धनं वेदाध्ययनं स्वगृहे च भिक्षाचर्येति। सद्योवधूनां तु उपस्थिते विवाहे कथञ्चिदुपनयनमात्रं कृत्वा विवाहः कार्यः'[७८] इति। गोभिलगृह्यसूत्रमपि एतत् स्पष्टरूपेण कथयति यथा- 'प्रावृत्तां यज्ञोपवीतिनीमभ्युदानयन् जपेत् सोमो ददद् गन्धर्वायेति'।[७९]

उपनयनसंस्कारसम्बन्धः यमोक्त्यनुसारेण ज्ञायते यत् प्राचीनकाले मुञ्जमेखलाधारणं नारीणां नियमः आसीत्। नार्यः वेदपाठाधिकारिण्य आसन्। एताः गायत्रीमपि उच्चारयन्ति। केवलं पिता, भ्राता, पितृव्यो वा एताः पाठयन्ति स्म। स्वगृहे एताः भिक्षाटनं कुर्वन्तिस्म। मृगचर्मधारणं, बल्कलग्रहणं, जटाधारणं च एतासां कृते निषिधम्। यथा-

पुरा काले कुमारीणां मौञ्जीबन्धनमिष्यते।
अध्यापनं च वेदानां सावित्रीवाचनं तथा॥

पिता पितृव्यो भ्राता वा नैनामध्यापयेत् परः।
स्वगृहे चैव कन्यायाः भैक्ष्यचर्या विधीयते॥

वर्जयेदजिनं चीरं जटाधारणमेव च।[८०] इति।

एतेन प्रमाणितं भवति यत् धर्मसूत्रकालं यावत् नारीणामुपनयने पूर्णाधिकार आसीत्। एताः वेदाध्ययनं कुर्वन्ति स्म। यौवनप्राप्तेः पूर्वमेतासां छात्रजीवनं समाप्तं भवति। मनुः केशान्तं यावत् समस्तसंस्कारवर्णनप्रसङ्गे कथयति यदेते संस्काराः स्त्रीणां कृतेऽपि करणीया इति। एतेन प्रमाणितं भवति यत् मनुकालेऽपि नारीणामुपनयनसंस्कार आसीदिति। परन्तु अस्मिन् कर्मणि मन्त्रोच्चारणस्य निषेधः कृतः। न केवलमुपनयनमपि तु विवाहसंस्कारः नारीणामासीदिति मनुः प्रतिपादितवान्। तदनुसारेण पतिसेवा, श्वशुरालयावस्थानं च गुरुकुलवासतुल्यं भवति। गृहकार्यं सायं प्रातः होमतुल्यं भवति।[८१] मनोरनन्तरं कोऽपि स्मृतिकारः नारीणामुपनयनसंस्कारविषये किमपि न प्रकाशयति।

अष्टमशताब्द्यन्तर्गतः स्मृतिकारःयमः उपनयनसंस्कारं प्राचीनकालस्य प्रथारूपेण उल्लिखति। यमस्यानया उक्त्या प्रमाणितं भवति यत् खी.पू. २०० वर्षे बालकानां बालिकानां च उपनयनकर्म आसीत्। केवलमयमेव भेद आसीत् यत् उपनयनानन्तरं बालकाः गुरुकुलं गच्छन्ति स्म बालिकाः स्वगृहे अभिभावकसविधे शिक्षालाभं कुर्वन्ति स्म।

वैदिकप्रार्थनासंपादनाय केवलं तादृशः जनः अधिकारी भवति, यः उपनयनसंस्कारेण संस्कारितः भवति। अत एवैतत् स्पष्टं भवति यत् यथा बालकाः उपनयने अधिकारिणस्तथा बालिका अपि आसन्।

वेदारम्भसंस्कारे नारी -

वैदिककाले उपनयनानन्तरं पुत्रवत् कन्या अपि गुरुगृहे स्थित्वा वेदाध्ययनं कृतवत्यः इति प्रमाणं दृश्यते। गार्गी-सुलभा-मैत्रेयी-कात्यायनादिस्त्रियः वेदविद्यासु निष्णाता आसन्। पुनः श्रौतयागेषु 'इमं मन्त्रं पत्नी पठेत्' इति कथनेन स्त्रियः अपि गुरुकुले स्थित्वा वेदं पठन्ति स्म इति प्रमाणम्। हारीतस्तथा यमप्रणीतस्मृतिशास्त्रे एतत् स्पष्टं भवति यत् गायत्रीमन्त्रे वेदाध्ययने च नारीणामधिकार आसीदिति। उपनयनानन्तरं बालकानामिव बालिकानामपि समानरूपेण वेदाध्ययनं भवति स्म। वैदिकछात्रेषु ब्रह्मवादिन्यः नार्यः आजीवनं ब्रह्मचारिण्यः स्थित्वा वेदानामध्ययनमध्यापनं च कुर्वन्ति स्म। वेदेषु एतादृशानां ब्रह्मवादिनीनां ऋषिकाणामुल्लेखः वर्त्तते, याः ऋग्वेदमन्त्राणां दर्शनं कृतवत्यः। पुनरपि कौशल्यायाः वैदिकमन्त्रैः हवनकार्यसंपादनं वेदारम्भसंस्कारे नारीणां योगदानं दृढीकरोति।[८२]

सीतायाः पञ्चवट्यां सन्ध्योपासनारतजीवनधारणं[८३]यथा (४/१४/४९) तथा तारादेव्याः मन्त्रवित्तता स्त्रियः मन्त्रविदः इति प्रमाणं दृश्यते। ब्रह्मचर्याश्रमे सावित्रीमन्त्रोपदेशः गुरोःमुखाद् ग्रहणं कृत्वा स्वगृहे स्थित्वा एव स्त्रियः भिक्षाटनं कुर्वन्ति स्म इति यममतं पूर्वमालोचितम्।

नारीणां समावर्त्तनसंस्कारः -

वैदिकयुगेऽपि कन्यकानां वेदाध्ययनानन्तरं गृहस्थाश्रमे प्रवेशाय समावर्त्तनसंस्कारः क्रियते स्म। आश्लायनगृह्यसूत्रे समावर्त्तनसंस्कारप्रसङ्गे स्त्रीणामुल्लेखो दृश्यते। तथाहि - 'अनुलेपनेन पाणी प्रलिप्य मुखमग्रं ब्राह्मणोऽनुलिम्प्येत्, बाहू राजन्य, उदरं वैश्यः, उपस्थं स्त्री, उरू सरणजीविनौ''[८४] इति। एतदनुसारेण समावर्त्तनसमये ब्राह्मणः अनुलेपनेन पाणी प्रलिप्य मुखमग्रेऽनुलिम्पेत्। क्षत्रियः स्वभुजद्वयं, वैश्यः स्वमुदरं, स्त्री स्वगर्भस्थानं, सरणजीविः स्वजङ्घाद्वयं च लिम्प्येत्। हारीतवचनानुसारेण रजोदर्शानात् पूर्वं नारीणां

समावर्त्तनं भवेत्। यथा - 'प्राग्रजसः समावर्त्तनमिति'।[८५]

विवाहसंस्कारे नारी-

"अयज्ञो वै पुरुषः योऽपत्नीकः"[८६] इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे श्रूयते। विवाहितस्त्रियं विना पुरुषः सामाजिककर्मणि अनुपयुक्तः। महाभारते स्मृतिशास्त्रेषु पुराणशास्त्रादिषु एतस्मिन् प्रसङ्गे बहु चर्च्चितम्। अपत्नीकः कर्मयोग्यो न जायते। पञ्चमहायज्ञादिसंपादने अधिकारस्थापनार्थं पुरुषः अवश्यं पत्नीं स्वीकुर्यात्। पञ्चमहायज्ञसंपर्कात् तत्र सा स्त्री पत्नीति नाम्ना प्रसिद्ध्यति। महर्षिः पाणिनिरपि एतस्मिन् प्रसङ्गे उपदिशति - "पत्युर्नो यज्ञसंयोगे"[८७] इति। पत्न्याः सहभागित्वं शतपथतैत्तिरीयादिब्राह्मणग्रन्थेषु च समुपलभ्यते। विना पत्नीं पुरुषस्य असिद्धत्वमपि वैदिककालात् ज्ञायते। तद्यथा - "अधो ह वा एष आत्मनः यत् पत्नी"[८८] इति। परमार्थतस्तु शृङ्खलितसमाजसङ्घटनार्थं स्त्रीणां मुख्यत्वमेव। कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां स्त्रीणां कामनापूर्त्तिनिमित्तिं समुचितसन्तानोत्पादननिमित्तं स्त्रीविवाहः प्रशंसितः।

विवाह एव स्त्रीणां वैदिकसंस्कारोपनयनम्[८९] इति समुद्घोषयन् मेधातिथिः विवाहसंस्कारः स्त्रीणामुपनयनसंस्कारतुल्यो भवतीति प्रतिपादयति। स्मृतिकारोऽपि विष्णुः एतत् स्वीकरोति। विवाहसंस्कार एवाशेषगृहयज्ञानां संस्काराणां चोद्गमस्थलम्। तत्र संस्कारेऽस्मिन् बहुषु स्थलेषु कन्यायाः कृते मन्त्रपठनार्थं निर्द्देशः दृश्यते। अग्निप्रदीपनाद्यनन्तरं कन्यादानकर्त्ता सुवस्त्रालङ्कृतां कन्यां वरसम्मुखमानयति। तत्र वधूवरौ च निम्नमन्त्रं पठतः। तद्यथा -

ओँ समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ।
सं मातरिश्वा सं धाता समुदेष्ट्री दधातु नौ।।[९०] इति।

पुनश्च दृश्यते यत् विवाहहोमकुण्डस्य पश्चिमभागे, पूर्वस्थापितासने, पूर्वाभिमुखेन वरः उपविशेत्, तस्य दक्षिणपार्श्वे वधूः उपविशेत्। तदानीं वधूः निम्नमन्त्रं पठति-

ओँ प्रमे पतियानः पन्थाः कल्पतां शिवाः अरिष्टा पतिलोकं गमेयत्।[९१]

इति। तदेवं विवाहसंस्कारे नारीणां महत्त्वपूर्णा भूमिका आसीदिति ज्ञायते।

नारीणामन्त्येष्टिसंस्कारः -

जीवदशायां यथा पुरुषः तथा स्त्री अपि महत्त्वपूर्णा जायते। स्त्री यदा मृता भवति तदा अन्त्येष्टिसंस्कारः अपि कर्त्तव्यः। यदि स्त्री सवर्णा - वृत्तवती - साध्वी भवति तर्हि पूर्वमृतां तां स्वकीयपतिः दहयेत्। एतदेव दाहकर्म पुरुषस्य यज्ञपात्रादिभिः सह कर्त्तव्यः।

एतेन आहिताग्निः गृहस्थः एवं कुर्यादिति सिद्ध्यति। भगवता मनुना उपदिश्यते यथा-

एवंभूतां सवर्णां स्त्रीं द्विजातिः पूर्वमारिणि।
दाहयेत् अग्निहोत्रेण यज्ञपात्रैश्च धर्मवित्॥[९२] इति।

अन्त्येष्टिकर्मसमाप्त्यनन्तरं गृहस्थेन शीघ्रातिशीघ्रम् अग्न्याधानं कर्त्तव्यम्, यतोहि पूर्वस्थापितः अग्निः अन्त्येष्टिकर्मणि व्यवहृतः इति सूच्यते तेनैव स्मृतिकारेण। पुनराधाननिमित्तं ... वचनं यथा-

भार्यायै पूर्वमारिण्यै दत्त्वाऽग्नीनन्त्यकर्मणि।
पुनर्दारक्रियां कुर्यात् पुनराधानमेव च॥[९३] इति।

अन्त्येष्टिसंस्कारे यथा पतिकृतं कर्म तथावत् पत्नीकृतं कर्म विधीयते। पतिः यदि पूर्वं मृतः भवति, तर्हि पत्नी अग्निविहीना जायते। अत एव पत्याहिताग्निना यथा पत्युः अन्त्येष्टिसंस्कारः, तथा तेनैवाग्निना पत्न्याः अन्त्येष्टिसंस्कारः कर्त्तव्यः। अर्थात् पतिव्रता स्त्री मृतं पतिमग्नौ संस्थाप्य स्वयं तदग्निप्रवेशं कुर्यात्। तेनैवोभयोः अन्त्येष्टिसंस्कारः स्वकीयपत्युः प्रेतकर्मसंपादनकाले द्रोणस्य पत्नी कृपी तत्रोपस्थिताऽसीत्। अस्मिन् सम्बन्धे महभारते समुपलभ्यते यथा-

अग्नावग्निं समाधाय द्रोणं हुत्वा हुताशने।
गच्छन्त्यभिमुखा गङ्गां द्रोणशिष्या द्विजातयः।
अपसव्यां चितिं कृत्वा पुरस्कृत्य कृपीं च ते॥[९४] इति।

युधिष्ठिरः कर्णपत्न्या सह कर्णस्य प्रेतकार्यं कृतवान्। तदुक्तं यथा-

स ताभिः सह धर्मात्मा प्रेतकृत्यमनन्तरम्।
चकार विधिवद् धीमान् धर्मराजो युधिष्ठिरः॥[९५] इति।

पुनः युधिष्ठिरः द्रौपद्या सह आचार्यद्रोणस्य तथा स्वकीयकुमाराणामन्त्येष्टिसंस्कारं सम्पादितवान्। तद्यथा-

युधिष्ठिरस्तु द्रोणस्य कर्णस्य च महात्मनः
धृष्टाद्युम्नाभिमन्युभ्यां हैडिम्बस्य च राक्षसः।
विराटप्रभृतीनां च सुहृदामुपकरिणाम्
द्रुपद-द्रौपदेयानां द्रौपद्या सहितो ददौ॥[९६] इति।

अनेनज्ञायते, यत् पुरुषवत् स्त्रीणामपि अन्त्येष्टिसंस्कारे अधिकारः विद्यते इति।

वेदे नारीणां स्थानम्

वैदिकवाङ्मये नारीणां महत्त्वप्रसङ्गे बहुलतया विचारविमर्शः कृतः। तत्र नारीणां स्थानमतीवगौरवपूर्णं सम्मानजनकं स्वातन्त्र्यपूर्णं च वरीवर्ति। धनदात्रीत्वेन लक्ष्मीरूपेण, शक्तिमयीत्वेन दुर्गारूपेण, विद्यादात्रीत्वेन सरस्वतीरूपेण च एताः नार्यः प्राचीनकालादेव वैदिकऋषिभिः परिपूज्यन्ते। यदि देवीनां प्रसङ्गे विचारः क्रियते, तर्हि बहूनि नामानि वेदेषु गीयन्ते। तत्र अदिति-उषा-इन्द्राणि-ईला-भारती-होत्रा-सिनीवाली-श्रद्धा-पृश्न्यादयः प्रमुखत्वेन अधिस्थापिताः सन्ति। किञ्च पुनः नारी माता-देवी-आदिशक्तिदेवकन्यादिरूपेण प्राचीनऋषिमुनिभिः स्वीकृताऽस्ति। तथैव पाश्चात्यदेशेषु मिस्र इति देशे ऐतिहासिककाले नारी मातृरूपेण युनानीदेशे थेमिश् इति शब्देन देवमाता इति मन्यते स्म।

ऋग्वेदे प्रायशः अशीतिवारम् अदितिदेव्याः उल्लेखः प्राप्यते। इयं च अदितिः देवमातारूपेण आर्यजनैः पूजिता आसीत्। तत्र सा अदितिः मित्र-वरुण-रुद्र-आदित्य-इन्द्रादीनां मातृत्वेनोल्लिखिता। उदाहरणतः प्रसूतिगृहे स्वयमदितिः इन्द्रदेवं स्तन्यपानात् पूर्वमेव सोमरसपानं कारयति स्म। अदिति कुत्रचित् अष्टवसूनां पुत्री तथा कुत्रचित् आदित्यानां भगिनीरूपेण स्वीकृता वर्त्तते। ऋग्वेदस्य दशममण्डलान्तर्गतस्य एकशततमे सूक्ते अदितिः ''सर्वतातिम्'' अर्थात् सर्वग्राहिणिरूपेण कथिताऽस्ति। तत्र अदितिशब्दस्यार्थः बन्धनमुक्तस्तथा स्वाधीन इति व्याख्या विहिता। तथैव सप्तममण्डलान्तर्गतदशमसूक्तस्य चतुर्थमन्त्रे सा अदितिः विश्वजन्येति शब्देन वर्ण्यते, या तु विश्वहितैषिणीत्यस्माभिर्ज्ञायते। ऋग्वेदे वर्णितमस्ति यत् अदितिः आकाश-अन्तरिक्ष-मातृ-पितृ-पुत्रादिसमस्तदेवानां माता। पुनश्च सैवादितिः पितृ-देव-गन्धर्व-असुर-राक्षसानां पञ्चजनानां माता इति प्रतिपादिता। यथा -

अदितिर्द्यौरदितिरन्तरिक्ष मदितिर्माता स पिता स पुत्रः।
विश्वे देवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम्।। इति।।[१७]

अदितिः साक्षात् जन्मनः कारणमिति ज्ञायते। सा तु पापहारिणी देवीरूपेण पूज्यते। तत्र ऋग्वेदे दृश्यते - ''हे मातः! मित्र-वरुणादीनां जन्मदात्रि! अस्मान् पापादेव रक्षस्व''[१८] इति। पुराणेषु या एवादितिः दैत्यानां मातृरूपेण स्वीक्रियते, सा तु ऋग्वेदे एवं प्रकारेण प्रतिपादिता -

"हिरण्यरूपमुषसो व्युष्टा वयः स्थूणमुदिता सूर्यस्य।

आरोहथो वरुणमित्र गर्तमतश्चक्षाथे अदितिं दितिं च॥"[९९] इति।

अदित्या सह दित्याः नाम केवलं त्रिवारमेवोद्धृतमस्ति ऋग्वेदे। परन्तु सर्वत्र दितिः देवीरूपेण वर्ण्यते स्म, न तु दैत्यानां मातृरूपेण। ऋग्वेदे कतिपयस्थानेषु द्यावापृथिवी च देवीरूपेण वर्ण्यते। तत्र दशममण्डले १५९-१६० सूक्ते द्वयोः देव्योः विवरणं प्राप्यते। यत्र एते द्वे यज्ञवर्द्धिका-महती-यजमानमाता-उदारासदया-माता-पिता-अमृतदात्री-सहोदराभगिनी-प्रज्ञायुक्ता-चैतन्यस्वरूपिणी-सुखदायिनी-सुजाता-निपुणा-जीवरक्षिणी-फलदात्रादिभिः नामभिः परिकल्पिते स्तः।

कर्षितभूमिरेखा तु सीतारूपेण शुक्लयजुर्वेदे महीधरेण व्याख्या क्रियते। परन्तु ऋग्वेदे कतिपयस्थलेषु सीता तु देवीरूपेण स्तूयते। यथा-

अर्वाची सुभगे भव सीते वन्दामहे त्वा।

यथा नः सुभगाससि यथा नः सुफलाससि॥

इन्दः सीतां नि गृह्णातु तां पूषानु गच्छतु।

सा नः पयस्वती दुहामुतरामुत्तरां समाम् ॥ इति॥ [१००]

अर्थात् - 'हे सौभाग्वती सीते ! वयं त्वां स्तुतामहे। त्वमस्मान् धनं सुन्दरं फलं च प्रदस्व'इति। अस्मादेव ज्ञायते यत् संपूर्णवैदिकवाङ्मये बहुषु सूक्तेषु मन्त्रेषु च नारीणां महत्त्वं, समाजे तासाम् उच्चस्थानं च कीदृशमिति।

'नारी' शब्दस्य व्युत्पत्त्या वैदिकवाङ्मये नारीणां स्थानमपि परिकल्पयितुं शक्यते। तत्र 'नृ' शब्दात् 'नर' इति शब्दस्य व्युत्पत्तिर्जायते। तस्मात् 'नृ' अथवा 'नर' शब्दात् 'नारी' शब्दः निष्पद्यते। वेदे विशेषतः ऋग्संहितायां नारीशब्दस्य प्रयोगः बहुलतया उल्लिखितोऽस्ति। परन्तु अथर्वसंहितायां 'नारि' तथा 'नारी' इति द्वयोः पदयोः प्रत्येकं सप्तवारं प्रयोगः कृतः। तत्र व्याकरणदृष्ट्या नारीशब्दस्य व्याख्या नर + ङीष् अथवा नृ + अन् + ङीन् इति व्युत्पत्तिरूपं महाभाष्यकारेण महर्षिपतञ्जलिना प्रतिपादितम्। तदीये महाभाष्ये 'नुधर्म्या नारी', 'नरस्यापि नारी'[१०१] इति कथनेन नार्याः महत्त्वं प्रतिपादितम्। नृ अथवा नरशब्दात् 'नृनरयोवृद्धिश्च' तथा 'शार्ङ्गरवादिठ' इति सूत्राभ्याम् ङीन् प्रत्यये युक्ते नारीशब्दः निर्मीयते। महर्षियास्कमतानुसारं नारीशब्दः मूलतः नरशब्दात् 'नृत् नर्त्तने' इति धातोः निष्पद्यते। स्वस्य निरुक्ते 'नराः -मनुष्याः नृत्यन्ति कर्मसु'[१०२] इति निगदितमस्ति। अनया व्युत्पत्त्या स्पष्टं भवति यत् नराः स्वस्वकार्यसंपादने स्वाङ्गानां

सञ्चालनं कुर्वन्ति स्म। तस्मादेव कारणात् ते नराः इति कथ्यन्ते। नारीशब्दोऽपि नरशब्दादेव व्युत्पन्नत्वात् नर इव समाजे नारी स्वस्याः सर्वेषु अधिकारेषु सुप्रतिष्ठिताऽभवत्। ऋग्संहितायां सप्तममण्डले नृशब्दात् निर्मितः नरशब्दः अथवा नारीशब्दः वीरत्वकार्यदाननेतृत्वाद्यर्थेषु प्रयुक्तो भवति। संहितायां नरेण सह नारी सहयोगिनीत्वेन परिवारे यज्ञे दाने अतिथि-साधु-भिक्षूणां स्वागतसत्कारे च तथा बहिर्भागे युद्धक्षेत्रेऽपि कार्यं कृतवतीति प्रमाणं मिलति।[१०३] पारष्करगृह्यसूत्रे विवाहकाले कन्यादानपाणिग्रहणादिकार्यानन्तरं लाजाहोमस्यावसरे कन्यायै सर्वप्रथमं नारीशब्दस्य प्रयोगः कृतः।[१०४] यतोहि अस्मात् पूर्वादेव तस्याः सम्बन्धः नरेण सह नासीत्। नारीत्वस्य भावनायाम् आगतायाम् तन्मुखादेव 'आयुष्यमानस्तु मे पतिः', 'एधन्तां ज्ञातयो मम' इति वाक्यानि निष्पन्नानि भवन्ति। सा नारी अनन्तरं सौभाग्यवतीति पदं प्राप्नोति।

अथर्वसंहितायां नैकेषु काण्डेषु 'इ' कारान्तनारिशब्दस्य प्रयोगः जातः।[१०५] आचार्यसायणस्य मतानुसारं नारीतिशब्दस्य भावः नरस्योपकारहेतोः प्रयुज्यते। अस्मात् कारणादेव सायणः स्वयं कथयति यत् 'नृणां महावीरार्याणामुपकारीत्वात् नारिः'। पुनश्च न अरिः नारिः इति व्याख्या विहिताऽस्ति।[१०६] ब्राह्मणग्रन्थेष्वपि नारिः इति पदस्य प्रयोगः बहुवारं दृश्यते। तत्र नारी-नारिशब्दयोः विभेदस्य कारणं यथा-

पुरुष-पूरुषयोरिव नारीशब्दस्यापि रूपद्वयं वैदिकसंहितायामुपलभ्यते। तत्र प्रश्नः समुदेति यत् किं मन्त्रद्रष्टारः ऋषयः 'ऊ' कारादिपूरुषशब्दस्य कृते 'ई' कारान्तनारीशब्दः तथा 'उ' कारादिपुरुषशब्दस्यकृते 'इ' कारान्तनारिशब्दस्य साक्षात्कारः कृते ? उभयोः नारी-नारिशब्दयोः विशेषान्तरं न दृश्यते। अथर्वसंहितातिरिक्तेषु ऋग्गादिसंहितासु एतयोः शब्दयोः प्रयोगः नाभूदिति। अत्र मनसि सन्देहः उत्पद्यते यत् किमर्थं विश्वस्य प्राचीनमादिग्रन्थ-ऋक्संहितायां बहुलतया नारीशब्दस्य प्रयोगेऽपि वारमेकं नारिशब्दस्य प्रयोगः न जातः ? अनेन प्रमाणितं भवति यत्सर्वतोभावने नरान् प्रति स्वात्मसमर्पणं कृता ऋग्संहिताकालीनस्त्री अथर्वसंहिताकाले पवितर्त्तिता जाता। तथा पुरुषवर्गान् प्रति तासां क्षोभः सञ्जातः। अस्मात् कारणादेव वैदिकसंहितायाः सर्वश्रेष्ठभाष्यकारः आचार्यः सायणः नारिशब्दस्य व्युत्पत्त्यां न + अरिः = नारिः अथवा नृणां महावीरार्थिनामुपकारित्वात् नारिः इति व्याख्यां प्रतिपादितवान्। अथर्वसंहितायाम् एका स्वाभिमानिनी नारी स्वपतिं कथयति - 'अहं वदामि नेत्त्वं सभाया महत्वं वद'[१०७] इति। एतदतिरिक्तं मैत्रायणिसंहितायामपि प्रमाणमुपलभ्यते - 'पुमांसः सभां यान्ति न स्त्रियः'[१०८] इति। अर्थात् सभां प्रति गन्तुं पुरुषाः समर्थाः न तु स्त्रियः। वैदिकसंहितायामेका पतिव्रता नारी यदा

बहुविवाहं करोति तदा तत्र 'नारिः' इति प्रयोगः कृतः। भिन्नता तु स्पष्टमेव भवति यत् ऋग्वेदकालीना नारी पाणिग्रहणसंस्कारादनन्तरं नरेण सह संपर्ककारणात् स्वकृते नारीशब्दस्य प्रयोगं कृतवती, सैव नारी अथर्वसंहितायां स्वस्याः सपत्नीव्रतात् भयभीता सती स्वपत्युः नपुंसककरणे तान्त्रिकमन्त्राणामपि प्रयोगं कर्त्तुं पश्चात्पदा न भवति।[१०९]

नारीशब्दस्य कृते प्रयुक्तः वैदिकशब्दः -

मेना - वैदिकवाङ्मये 'मेना' शब्दस्य प्रयोगो नारीशब्दस्य कृते विहितोऽस्ति। आचार्ययास्कमतानुसारं मेनाशबदस्य व्युत्पत्तिः एवं भवति - मानयन्ति एनाः (पुरुषाः)[११०] इति। अर्थात् पुरुषेणादरप्राप्ता नारी। सम्भवतः परवर्त्तिसाहित्येषु 'मेना' शब्दः लौकिकसंस्कृते 'मान्या' शब्दरूपेण परिवर्त्तितः।

योषा - यु - एकत्रीकरणे इति धातोः निष्पन्नाः योषन्-योष-योषणा-योषित्शब्दाः समानार्थकाः भवन्ति। ये तु युवती-नारीइत्याद्यर्थबोधका अपि भवन्ति। वैदिकवाङ्मये योषाशब्दस्य प्रयोगः बहुलतया दरीदृश्यते। योषन्शब्दः ऋग्संहितामण्डले, योषणाशब्दोऽपि तत्रैव, योषाशब्दः योषित्शब्दस्तथा अथर्वसंहितायामपि प्रयुक्ताः दृश्यन्ते। निरुक्ते योषाशब्दस्य व्युत्पत्तिकरणे यास्केन लिखितमस्ति - 'योषा यौतेः मिश्रणार्थस्य, सा हि मिश्रयति आत्मानं पुरुषेण साकम्'[१११] इति। अर्थात् नारी योषेति कथ्यते, यतोहि सा सर्वात्मना स्वां पुरुषेण सह संयोजयति।

युष् - परिक्रमेण 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति सूत्रेण कर्त्तरि अच्, गुणे स्त्रीत्वविवक्षायां 'टाप्' प्रत्यये भूते 'योषा' शब्दः निष्पद्यते। 'युषः सौत्रः सेवायाम्' योषति सेवते इति योषा अर्थात् सेवाव्रता नारी।

जाया - जायेति शब्दस्य महिमा ऋग्संहितायां बहुत्र व्यवह्रियते। तत्र वर्णितमस्ति यत् तद्गृहं सर्वश्रेष्ठं मन्यते, यत्र निवसति दिव्यगुणविमण्डिता जाया। यथा-

अपाः सोममस्तमिन्द्र प्र यादि कल्याणीर्जाया सुरणं गृहे ते।
यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत्।।[११२]

पुनश्च ऋक्संहितायां नार्या स्वरूपवर्णनं ससम्मानं प्रतिपादितमस्ति - 'हे इन्द्र ! जाया एव गृहम्, सा तु पुरुषस्य विश्रामगृहं वर्त्तते'[११३] इति। ऐतरेयब्राह्मणे जायायाः प्रशंसायां प्रतिपाद्यते 'आहुतिरेषा भूतिः' इति। अर्थात् इयमेव शोभा, इयं तु ईश्वरीया वर्त्तते। अत्र व्युत्पत्त्यां स्पष्टमेव प्रतिफलितमस्ति यत् 'तज्जाया जाया भवति यदस्यां जायते पुनः' इति। अर्थात् सैव जाया कथ्यते। यतोहि पुरुषः स्वयमेव तस्यां पुत्ररूपेण जन्मग्रहणं करोति।

जायते अस्याम् अर्थात् गर्भस्याधारत्वात् सा नारी जायेति कथ्यते। 'जनेर्यक्' इति सूत्रेण 'यक्' प्रत्यये भूते जायाशब्दः निष्पद्यते। जायाशब्दोऽयं नारीवाचकः।

ग्ना - ऋक्संहितायां ग्नाशब्दस्य प्रयोगः सामान्यतया नारीत्यर्थे विधीयते।[११४] ब्राह्मणग्रन्थेषु 'ग्ना' -शब्दस्य प्रयोगः बहुवारं दृश्यते। शब्दस्यास्य ऋग्वेदे देवपत्नीत्यर्थे प्रयुज्यते। यथा -

" उत ग्ना व्यन्तु देवपत्नीरिन्द्राण्य ग्नाय्यश्विनी राट्।
आरोदसी वरुणानी श्रुणोतु व्यन्तुं देवीर्य ऋतुर्जनीनाम्।।" इति।।[११५]

निरुक्तकार - आचार्ययास्कानुसारं 'ग्ना'शब्दस्य व्युत्पत्तिः भवति 'ग्ना' गच्छन्ति एनाः' इति। अस्मात् स्पष्टं भवति नारी 'ग्ना' इति कथ्यते। यतोहि पुरुषः संसर्गस्याभिलाषापूर्त्तये तां प्रति गमनं करोति। लौकिकसंस्कृतस्य 'गम्या' शब्दः ग्ना इति शब्दस्य विकसितरूपमिति परिज्ञायते। परवर्त्तिवाङ्मये धेना-मेनादयः शब्दाः 'ग्ना' इत्यस्य परिवर्त्तितरूपाः इति वक्तुं शक्यते।

नारीसम्बन्धवाचकाः अन्ये शब्दाः -

वैदिकसंहितायां नारीशब्दस्य कृते मातृष्वसादायः एते वाचकशब्दाः दृष्टिगोचराः न भवन्ति, ये संप्रति उपलभ्यन्ते। यथा - मातृष्वसा-पितृष्वसा-पितृव्यपत्नी-मातली-मातुलानी-इत्यादयः। मैत्रायिणीसंहितायां केवलं वारमेकं मातुः, भ्राता, मातुलः इति शब्देन प्रयुक्तोऽस्ति,[११६] यतोहि संहिताकाले नारीं विना नरः नारायणः भवितुं न पारयति स्म। ऋक्संहितायां श्यालः इति शब्दः एकवारं प्रयुक्तोऽस्ति, य एव शब्दः संप्रति शालकः इति शब्देनावगम्यते।

नारीणां कृते प्रयुक्तानि विशेषणानि-

यमूस् - वैदिकवाङ्मये यदि एका स्त्री एकवारमेव शिशुद्वयोः जन्मदात्री भवति, तर्हि सा यमूस् इति कथ्यते। यमशब्दः यमजस्य द्योतकः भवति, यस्योल्लेखः ऋग्संहितायाः विभिन्नमण्डलेषु प्राप्यते।[११७] यमोमिथुनौ सम्भवतः विषमलैङ्गकसन्ततिः इति तात्पर्यः कठकसंहितायां वर्त्तते।[११८] अथर्वसंहितायामपि यमजसन्ततिः अशुभत्वेनानुमीयते।[११९]

अमानुषी - देवाङ्गना-अप्सरा-इत्यर्थे अमानुषीविशेषणपदमथर्वसंहितायां प्रयुक्तमस्ति।[१२०] यत्र पुरूरवा मानवः सन्नपि देवाङ्गनया उर्वश्या सह संपर्कस्थापनानन्तरमनुरोधं करोति - हे उर्वशि, आगच्छ गृहं व्रजावः।

नर्त्तकी - ऋक्संहितायाम् उषसः तुलना कार्यरतनर्त्तक्या सह क्रियते। यत्र उषा

नर्त्तकीव विविधरूपं धारयति।[१२१] परन्तु भारतीयसभ्यतायां विविधरूपेण परपुरुषमाकृष्टं करोति या नारी, सा तु वाराङ्गना इति शब्देनाभिधीयते। अतः समाजे नर्त्तक्याः स्थानं नीचदृष्ट्या विचार्यते।

गुहाचरन्ती - मरुद्गणानां देदीप्यमानस्वर्णाभिकटारखड्गसदृशं भवति सा नारी या तु गोपनमिलनवती भवति इति ऋग्वेदात् ज्ञायते।[१२२]

पुंश्चली - कामार्त्ता सती परपुरुषमनुधावति या नारी सा पुंश्चलीति कथ्यते। एतादृशमुदाहरणमथर्वसंहितायां तथा वाजसनेयसंहितायां चोपलभ्यते।[१२३] संसारे स्वतन्त्रजीवनधारणकृते न काऽपि विप्रतिपत्तिः, परन्तु उत्सृङ्खलताहेया इति परिज्ञायते।

हस्रा - ऋक्संहितायां हसन्ती नारी उषसा सह तुलिता सती हस्रा इति विशेषणपदं धारयति। परन्तु परपुरुषमाकर्षयितुं हासकार्यं नीचदृष्ट्या विचार्यते।

सवासा - ऋक्संहितायां सा नारी सुवासा कथ्यते, या तु सुन्दरवस्त्रं धारयित्वा धनलोभेन अभिसरणं करोति।[१२४] परन्तु स्वपत्युः कृते या नारी सुन्दरं वस्त्रं धारयति, सा तु समाजे सर्वेषां श्रद्धावती भवति। तत्र ऋक् संहितायां वाग्देव्याः सरस्वत्याः तुलना सुवासा-इत्यनया सह विहिताऽस्ति।[१२५]

साधारणी - ऋक्संहितायां नार्यः कृते साधारणीत्यस्य शब्दस्य प्रयोगः जातः। यस्याः तुलना विद्युत् इति शब्देन सह क्रियते। तडिदिव शीघ्रगामिनी स्वरूपप्रदर्शनकारिणी नारी परपुरुषमालिङ्गति चेत् सा तु साधारणीति कथ्यते।[१२६]

समनगा - ऋक्संहितायां समनग इति शब्दस्यार्थो भवति मनोनुकूलमाचरणवती नारी।[१२७]

वध्रिमती - ऋग्वेदसंहितानुसारं नपुंसकपतिप्राप्ता स्त्री वध्रिमती इति कथ्यते, या तु अश्विनीकुमारयोः औषधसेवनेन पत्युः कृते पुरुषत्वं प्रापयति, तथा च पुत्रं प्राप्नोति।[१२८]

प्रवीता - गर्भवतीपत्न्याः कृते प्रवीताशब्दस्य प्रयोगः ऋक्संहितायां, वाजसनेयसंहितायां तथा काठकसंहितायां चोलभ्यते।[१२९]

अतित्वरी - वाजसनेयसंहितायाम् अतित्वरीशब्दः 'कुलटा' इत्यर्थे प्रयुक्तोऽस्ति।[१३०]

अतिष्कद्वरी - वाजसनेयसंहितायाम् अतिष्कद्वरीति शब्दः गर्भस्रावकर्तुनार्यर्थे प्रयुक्तः।[१३१]

महानग्नी - आचारभ्रष्टानारी महानग्नीति अथर्वसंहितायां कथ्यते।[१३२] शब्दोऽयं वेश्याशब्दस्य पर्यायवाचकः भवति।

प्रफर्वी - संहितासु स्थूलविलासिनी नारी प्रफर्वीति कथ्यते। यस्यार्थो भवति व्यभिचारिणी। प्रायशः शब्दोऽयं ऋक्संहिता-अथर्वसंहिता-तैत्तिरीयसंहिता-मैत्रायणीसंहिता-काठकसंहिता-वाजसनेयसंहितादिषु समुपलभ्यते।[१३३]

रजयित्री - यजुः संहितायां रतिकार्ये निपुणा नारी रजयित्रीत्यधिगम्यते। कुत्रचित् रजयित्रीशब्दस्यार्थः वस्त्रेषु रङ्गप्रदात्री नारीति व्यवह्रियते।

दासपत्नी - 'अपो अजयत दासपत्नी' - इत्यस्य प्रयोगः ऋक्संहितायां तथा 'विश्वदासी' एवं 'पुरोदासी' इति शब्दद्वयमपि तत्रैवोल्लिखितमस्ति। तैत्तिरीयसंहितायां या नर्त्तकी नारी चरणयोः नूपुरबन्धनं कृत्वा कन्यादासीरूपेण तिष्ठति, सा दासपत्नीति उच्यते। अथर्वसंहितायां परगृहेषु कार्यं कुर्वन्ती बालिकाऽपि दासपत्नीति कथ्यते।[१३४]

विदलकारी - वंशसामग्रीं निर्माति या सा विदलकारीति वाजसनेयसंहितायां कथ्यते।[१३५]

सु-शिल्पा - ऋग्वेदसंहितायां सुशिल्पा इति शब्दस्य प्रयोगः दृश्यते।[१३६]

सुपस्था - ऋग्वेदसंहितायां सुपस्था इति शब्दस्यापि प्रयोगः अवलोक्यते।[१३७]

संवयन्ती - यजुः संहितायाम् उषारूपिणी नारी स्वपत्युः कृते सुन्दरं वर्णनिर्मितं वस्त्रं निर्मातीति सा नारी संवयन्तीति कथ्यते। तत्र 'पेशसा ततं तन्तुं संवयन्ती' इत्येकस्मिन् मन्त्रे ध्वन्यते यत् वैदिककाले गृहेषु नारी कर्त्तव्यरता आसीदिति।[१३८] ऋक्संहितायामपि वयन्तीति शब्दस्य प्रयोगः दृश्यते। यथा - 'वस्त्रा पुत्राय मातरो वयन्ती' अर्थात् या माता स्वपुत्राय वस्त्रं वयति, सा तु संवयन्तीति कथ्यते।[१३९]

पेशस्करी - यजुःसंहितायां पेशस्करीति शब्दस्य प्रयोगः दृश्यते। वस्त्रमुपरि क्रियमाणं चित्रकार्यं या करोति, सा पेशस्करीति कथ्यते।[१४०]

उपलप्रक्षणी - ऋक्संहितायां प्रयुक्तस्य उपलप्रक्षणीति शब्दस्यार्थं यास्कमुनिना निरूपितं यत् या नारी सत्तुनिर्माणं करोति, सा नारी उपलप्रक्षणीति कथ्यते।[१४१] पुनश्च धान्येभ्यः तण्डुलनिर्माणकार्ये या निपुणा भवति, सा तु उपलप्रक्षणीति विशेषणेन ज्ञायते।

चतुष्कपर्दा - ऋक्संहितायां 'चतुष्पर्दा युवतिः सुपेशा' इति दृश्यते।[१४२]

गृहपत्नी - ऋक्संहितायामथर्वसंहितायां च गृहस्वामिन्याः अर्थबोधाय गृहपत्नीति शब्दस्य प्रयोगः जातः।[१४३]

ब्राह्मणसाहित्ये नारी - ब्राह्मणग्रन्थेषु शतपथब्राह्मणस्य सर्वाधिकं महत्त्वं वर्त्तते। शुक्लजुर्वेदीयब्राह्मणमिदं विषयविवेचनदृष्ट्या शास्त्रेषु सर्वश्रेष्ठग्रन्थत्वेन अद्यापि परिगण्यते। तत्र नारीविषयकः सन्दर्भः बहुलतया प्राप्यते। यत्र नारीणां महद्गौरवं तथा तासामुच्चशिक्षायाः योग्यताविषये च ज्ञायते। तदतिरिक्तं कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे सामवेदस्य पञ्चविंशब्राह्मणे तथा च अथर्ववेदस्य गोपथब्राह्मणे नारीणां विचारप्रसङ्गः बहुषु स्थलेषु उपलभ्यते। परन्तु शतपथ-तैत्तिरीयब्राह्मणयोः नारीणां विचाराधिकत्वात् तौ ग्रन्थौ आधारत्वेन सर्वत्र मान्येते। तत्र नारीजीवनस्य प्रथमावस्था कन्यारूपेण ख्याता।

कन्या - वेदकालीनसभ्यतायां विद्यमानेषु अनेकरूपेषु नार्यः कन्यारूपं तु समाजे आद्रीयते। पराशरगृह्यसूत्रानुसारं कन्या स्वस्याः विवाहानन्तरं नारीति रूपं धारयति। वैदिकसंहितासु प्रायशः ऋक्संहितायां तथा च अथर्वसंहितायां बहुवारमेव कन्याशब्दस्य प्रयोगः परिलक्ष्यते। य एव शब्दः नार्यः प्रथमसमाहितरूपत्वेन परिगृह्यते। यथा-

कन्येव तन्वा शाशदानाँ एषि देवि देवमियक्षमाणम्।
संस्मयमाना युवतिः पुरस्तादाविर्वक्षांसि कृणुषे विभाती।।[१४४] इति।

कन्यायाः समानार्थकवाचकशब्देषु ऋक्संहितायां कना-कनी-कन्यना-कनीनक-इत्यादयः शब्दाः, तथा च अथर्वसंहितायां कन्यला, अमरकोषे कानीनः, कन्यका जातः इत्यादि प्रयोगाः दृश्यन्ते। तत्रापि कन्-दीप्तौ धातोः अघ्न्यादित्वात् वक् + टाप्प्रत्यये संयोगे कन्या इति शब्दस्य निष्पन्नो भवति। 'कन्यात्वर्थमनुत्तमम्' इति महाभारते दृश्यते। तत्र कन्यातीर्थे स्नानं कृत्वा मानवः सहस्रगोदानस्य पुण्यफलं प्राप्नोति इति स्पष्टं प्रतिपादितमस्ति। ऐतरेयब्राह्मणग्रन्थे यद्यपि कन्या कृपणत्वेन स्वीक्रियते, तथापि केचन भाष्यकाराः तस्यार्थं कदर्थं कुर्वन्ति। यथा -

'सम्भवे स्वजनदुःखकारिका...... हृदयदारिका पितुः।' इति वचनमिदमङ्गीकृत्य हेमचन्द्रः स्वकीयशब्दानुशासने भणति यत् 'शोककरी कन्या' इति।[१४५] किञ्च कैवल्यप्राप्तये कन्यायाः भूमिका नास्ति। यतोहि पितृऋणपरिशोधः पुत्रस्य स्कन्धोपरि वर्त्तते। कन्यापेक्षया पुत्र एव पितरं संसारसागरात् रक्षति।[१४६] यद्यपि तैत्तिरीयसंहितायां नवजातकन्यायाः विरोधाभासं बहुषु स्थलेषु व्याख्याकाराः कुर्वन्ति, तथापि तत्रैव पुनः कन्याजन्मसमर्थनमपि कुर्वन्ति। धर्मशास्त्रानुसारं महाभारते कन्या तु साक्षात् लक्ष्मीत्वेन व्याख्याता। यथा- 'नित्यमनिवसने लक्ष्मीः कन्यकासु प्रतिष्ठितः' इति। आधुनिकसमाजे यद्यपि कन्याजन्मना जनानां सङ्कीर्णमनोवृत्तिः उदासीनता वा परिलक्ष्यते, तथापि परिवारे समाजे च कन्यका स्नेहपूर्णवातावरणेन नवीनं स्वर्गं रचयति। शतपथब्राह्मणे कन्या पुत्रवत् सर्वेषामादरणीया

तथा मान्या भवतीति प्रतिपादितम् ।[१४७] तैत्तिरीय-मैत्रायणीसंहितासु कन्यायाः सङ्गीतनृत्यादिषु अभिरुचिः प्रदर्शिता। शतपथब्राह्मणेऽपि स्त्रीणां सामगानप्रसङ्गः विद्यते, यत्र मन्त्राणां शुद्धोच्चारणं स्पष्टं प्रतिपादितम्। यथा-

अथ यैषा पत्न्यै व्रतदुघा। तामुद्गातृभ्यो ददाति पत्नीकर्म्मेव वाऽएतेऽत्र कुर्वन्ति यदुद्गातारस्तस्मात्तामुद्गातृभ्यो ददाति।। इति।। [१४८]

दुहिता - महर्षिः यास्कः तदीये निरुक्ते दुहिताशब्दस्य व्याख्यां प्रकारद्वयेन विदधाति। यथा - दुहिता दूरे हिता इत्यर्थस्य व्याख्यायां दुर्गाचार्यः यास्कस्य भावमेवं प्रकारेण स्पष्टयति - ''साहि यत्रैव दीयते, तत्रैव दुहिता भवति'' अर्थात् सा कन्या यत्र दीयते, तत्र तस्या आदरो न भवति। अथवा कन्याः दूरे स्थिते पितुः हितो भवति, पुनश्च यास्कस्य ''दोग्धेर्वा दुहिता'' इत्यर्थस्य व्याख्यायां दुर्गाचार्यः कथयति - सा हि नित्यमेव पितुः सकाशात् द्रव्यं दोग्धि प्रार्थनापरत्वात्, अर्थात् सा पितुः सर्वदा द्रव्याणां दोहनं करोतीति।[१४९] ऋक् संहितायाम् अथर्वसंहितायां च 'दुहिता' शब्दः कन्यायाः पर्यायवाचिशब्दत्वेन बहुषु स्थलेषु व्यवहृतोऽस्ति।[१५०]

गौरी - वैदिकवाङ्मये कन्या तु गौरीति शब्देन सम्बोध्यते। ऋक्संहितायां ''सोमो गौरी अधिश्रितः'' इति कथितमस्ति।[१५१] अस्मात् स्पष्टं भवति यत् कौमारावस्थायां सोमरसस्य पचनं कन्यायाः गौर्याः वा शरीरेऽभवत्।

अमाजुरः (अमाजूः) - वैदिककाले या कन्या विवाहं विना ब्रह्मचारिणीरूपेण मातुः पितुः गृहे वा स्थितवती सा तु अमाजुः इत्युपाधिं धारितवती। यदि पितुः गृहे अविवाहिता सती जीवनयापनं करोति, तर्हि सा 'पितृसद्' इति कथ्यते स्म। तत्र उदाहरणतः 'घोषा' नामा कन्या दृष्टिगोचरमायाति। सा तु ऋक्संहितायाः प्रथममण्डले ११७ इति सूक्तस्य साक्षात्कारं कृतवती।

पत्नी - पुरुषजीवनस्य असंपूर्णभागः स्त्रीसंयोगे पूर्णः भवति। तेषां संयोगात् मानवस्य सृजनं जायते। बृहदारण्यकोपनिषदि तथा च वाजसनेयब्राह्मणे उल्लिखितमस्ति - स्त्री एव पुरुषस्य उर्द्धाङ्गिनी। यावत्पर्यन्तं पुरुषस्य कृते जायाप्राप्तिर्न भवति, तावत्पर्यन्तं जीवनमसंपूर्णं तिष्ठति। यथा - '' अर्द्ध भो एष आत्मनः जाया.....सर्वो भवति'' इति। पुनस्च ''सा वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छत् स हैतावानास यथा स्त्रीपुमांसौ सम्परिष्वक्तौ स इममेवात्मानं द्वेधाऽपातयततः पतिश्च पत्नी चाभवतां ...। इति ''।[१५२] तत्र पत्नी शब्दस्य कृते भार्या-जाया-दारादिशब्दाः प्रयुक्ताः सन्ति। पतिः

स्वयं शुक्ररूपेण भार्यायाः गर्भे प्रविश्य पुत्रो भूत्वा जन्म लभते। अस्मात् कारणात् सा 'जाया' इति कथ्यते। यथा - ''भर्त्तव्यत्वेन भार्या च'' अर्थात् या जातं करोति सा जाया।[१५३]

ऐतरेयब्राह्मणे पत्नी जायागार्हपत्यः इति रूपेण सम्बोध्यते। यथा- ''यावत् जायां न विन्दते, असर्वो हि तावत् भवति''[१५४] भार्यायाः कर्त्तव्यप्रसङ्गे वाल्मिकीयरामायणे स्वयं रामचन्द्रः सीताप्रसङ्गे स्वानुजं लक्ष्मणं कथयति-

''कार्येषु मन्त्री करणेषु दासी धर्मेषु पत्नी क्षमया धरित्री।
स्नेहेषु माता शयनेषु रामा रङ्गे सखी लक्ष्मण सा प्रिया मे।।''

इति। पत्नी शब्दस्य पाणिनीयव्युत्पत्तिः एवं भवति यथा - स्त्री तदैव पत्नी कथ्यते, यदा सा पत्या संयुक्ता भवति।

माता - वैदिककाले मातृपदस्य महिमा भूरिशः प्रशंसितः। पारिवारिकजीवने माता मुख्या। सा हि त्याग-प्रेम-तपसां त्रिवेणीधारा। पितुः गुरोश्चापेक्षया श्रेष्ठा आसीत् माता। यथा - '' गुरूणां चैव सर्वेषां माता परमेको गुरुः'' इति। तत्र ऋग्वेदे उषसः वर्णनावसरे कथ्यते - ''यथा पुत्रः मातुः देदीप्यमानमुखं प्रति आकर्षितो भवति, तथैव हे उषस् ! त्वमपि अस्माकं कृते आकर्षणीया''[१५५] इति। तैत्तिरीयसंहितायां ऋणत्रये मातृ-ऋणस्य महत्त्वमधिकं वर्तते। शतपथब्राह्मणेऽपि सा नारी पूर्णतया मातृसंज्ञां धारयति, यदा सा कस्यापि सन्तानस्य जननी भवति।[१५६]

ऐतरेयब्राह्मणे सन्यासधर्मस्य निन्दा नारीणां कृते तावत्पर्यन्तमस्ति, यावत्पर्यन्तं विना पुत्रं सा जीवननिर्वाहं करोति। मनुस्मृतौ मातृशब्दस्य प्रशंसा एवं प्रकारेण क्रियते। यथा-

उपाध्यायान्दशाचार्य आचार्याणां शतं पिता।
सहस्त्रं तु पितृन् माता गौरवेणातिरिच्यते।।[१५७] इति।

ऋक्संहितायां मातुः अङ्कः सुखस्य शान्तेश्चाश्रयस्थलमिति ज्ञायते।[१५८] यदा सन्तानः क्रन्दति, ता त्यागमयीमातुः अङ्के उपविश्य सः चरमसुखमास्वादयति। तत्र एकस्मिन् स्थले माता दिव्या तथा द्यावापृथिवीभ्यामपि श्रेष्ठा इति उल्लिखिता। पुनश्च मधुभाषिणीप्रभृतिशब्देषु मातृशब्दस्य व्यवहारः दृश्यते।[१५९] वैदिकव्याख्याने मातृशब्दः मातर-जनि-जनित्री-जननी-प्रसूः-अम्बा-अम्बि-अम्बीतू-इत्यादिशब्दैर्द्योत्यते।[१६०] जनिः जनित्री वा शब्दः 'जन्' - उत्पन्ने इति धातोः निष्पद्यते। परन्तु ऋक्वेदे 'जनि' शब्दस्य प्रयोगः पत्न्याः कृते प्रयुक्तोऽस्ति। बहुषु स्थलेष्वपि शब्दोऽयं मातुः कृते

पर्यायवाचको भवति। जन्मकरणहेतोः सा माता सूः अथवा प्रसूः इति कथ्यते। अनेकपुत्राणां जननी महिषी इति कथ्यते।[१६१] वैदिककालीनमाता स्नेह-दया-ममता-सहिष्णुता-क्षमादिगुणानां साक्षात् आवताररूपेण परिगणिता आसीत्। एकास्मिन् स्थले अथर्ववेदे मातुः महिमा एवं प्रकारेण वर्णिताऽस्ति यथा -

पुमांसं पुत्रं जनय तं पुमाननु जायताम्।
भवासि पुत्राणां माता जातानां जनयाश्च यान्॥[१६२]

अतः वैदिकयुगे नारीणां स्थानं कीदृशमासीदिति अनुमातुं शक्यते।

आरण्यकोपनिषत्सु नारी -

विद्यमानेषु बहुष्वारण्यकोपनिषत्सु मुख्यतः नारीशब्दस्य वर्णनं च्छान्दोग्योपनिषदि तथा बृहदारण्यकोपनिषदि बहुलतया दृश्यते। आरण्यकेषु मुख्यतः ऐतरेयारण्यके स्त्रीणां विशिष्टं स्थानं वर्तते। तत्र स्त्री पुरुषादपि श्रेष्ठत्वेन परिगणिता भवति। तत्र उल्लिखितमस्ति यत् मानवः पत्नीं प्राप्य आत्मानं पूर्णमनुभवति। ऐतरेयारण्यकस्य पञ्चमाध्याये तथा ऐतरीयोपनिषदः द्वितीयेऽध्याये गर्भाधानस्य वर्णनं प्राप्यते। तत्र ऋषिः सभामध्ये यदा प्रवचनं प्रारभते, तदा गर्भवतीस्त्रीणामुपवेशनविषये निवारणं विदधाति। सर्वविदितं यत् पुरुष आत्मानं तस्याः गर्भे जन्म प्रददाति। [१६३]

तैत्तिरीयोपनिषदि ऋषिः कथयति - माता एव पूर्वरूपम् तथा पिता तु उत्तररूपम्। प्रजाः सन्धिः, प्रजननं तु सन्धानम् । यथा - " जाया पूर्वरूपम्, पतिस्तु उत्तररूपम् , पुत्रः सन्धिः, प्रजननं सन्धानम् " इत्यादि।[१६४]

वेदाध्ययनादनन्तरम् आचार्यः दीक्षान्तभाषणे नारीविद्यार्थिनीमनुशाशितुं कथयति - " हे सन्तानरूपा नारि ! त्वं सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमदितव्यमित्यादि । [१६५]तत्र नारीणां कृते ब्रह्मचर्याश्रमस्य गृहस्थाश्रमस्य प्रसङ्गे बहवः उपदेशाः प्रदत्ताः सन्ति। अतः कथ्यते - मातृदेवो भव, पितृ देवो भव, अर्थात् माता स्वयमेव देवीरूपेण लोकेषु पूज्यते । तैत्तिरीयारण्यके मातुः स्थानमद्वितीयमिति मन्यते। यथा - " नास्ति मातृसमो गुरुः, गायत्रीछन्दसां माता, मातृदेवो भव इत्यादयः" [१६६]

कठोपनिषद्यपि नार्याः चरित्रं सम्भोगकार्ये स्पष्टमेवोल्लिखितोऽस्ति - "रतिशीलाः हि योषितः इति।"[१६७] यतोहि "रमन्ते सांसारिकजनाः यस्यां सा रामा" तथा "रमन्ते

योगिनो यस्मिन् स रामः'' इति। इदं प्रेयमस्ति यत् मनुष्याः सुखभोगाय स्त्रियं प्रियद्रव्यत्वेन स्वीकुर्वन्ति। तथापि विचारदृष्ट्या तु नारीणां प्रशंसा बहुवारं प्रतिपादिता। कठोपनिषदि प्रथमतः पुरुषरूपेण ब्रह्मणः वर्णनं कृत्वा पश्चात् स्त्रीरूपेण वर्णनं जातम्। तत्र ऋषिः कथयति हे देवतामयि ! ब्रह्मशक्ति ! अदिते ! त्वं नः मातृतुल्या देवी। [१६८]

श्वेताश्वतरोपनिषद्यपि नारी तु मायारूपिणी, प्रकृतिरूपिणी, तथा बहुरूपिणीति च वर्ण्यते। परन्तु एकस्मिन् स्थाने नारी तु साक्षात् ब्रह्मरूपिणीति प्रतिपाद्य तत्र ऋषिः कथयति - '' हे देव ! त्वं स्त्री त्वं पुमान् असि, त्वं कुमार उत वा कुमारी''[१६९]

प्रकृतिः स्त्रीरूपेण भोग्येति स्वीकृत्य कथितमस्ति यत् - '' अजामेकां लोहितशुक्लकृष्णां........'' इति। अर्थात् शुक्लादिवर्णः अजारूपेण स्वीकृतोऽस्ति। यस्मात् प्रजाः जायन्ते। सा अजा प्रकृतिरिति कथ्यते। अजया साकं रमणेन सा अजा भोग्या इति कथ्यते। जीवात्मा प्रकृत्या साकं रमते। परन्तु परमात्मा न । अत्र जीवात्मा न स्त्री न पुरुषः न च नपुंसकलिङ्गवाचकः। सा प्रकृतिः माया। तथा महेश्वरः मायावी।[१७०] अतः अजारूपा प्रकृतिः जीवानां भोक्तृत्वेन परिकल्प्यते। यदुक्तमस्ति - ''ह्येका भोक्तृ भोग्यार्थं युक्ता''[१७१] इति।

बृहदारण्यकोपनिषदि नारीणां स्थानमत्यन्तं महत्त्वपूर्णमासीत्। तस्मिन्समये सद्योद्वाहा ब्रह्मवादिनीति द्विविधा नार्य आसन् । या ब्रह्मचर्याश्रमानन्तरं गृहस्थाश्रमे प्रविश्य आश्रमनियमानुसारं मातृत्वं प्राप्नोति, सा सद्योद्वाहानाम्ना प्रथिता। तस्याः विवाहवयः षोडश सप्तदश वेति निर्दिष्टमासीत्। इतः प्राक् गुरुकुले स्थित्वा अध्ययनं करोति स्म। किन्तु याः नार्यः अध्यात्मचिन्तनं तथा ब्रह्मसम्बन्धिचिन्तनं मनसिनिधाय अविवाहिताः भूत्वा तपस्विरूपेण जीवनं यापयन्ति स्म, ताः ब्रह्मवादिन्यः इति कथ्यन्ते। तासां त्यागमयं जीवनमनभूतिस्तथा निःस्वार्थपरसेवा समाजस्य कल्याणमेव मुख्यकर्म आसीत्। बृहदारण्यकोपनिषदि दृश्यते याज्ञबल्क्यऋषेः धर्मपत्नी मैत्रेयी तथा याज्ञबल्क्येन साकं शास्त्रार्थं कर्त्तुं समर्थाः। गार्गीप्रमुखाः ब्रह्मवादिन्यः आसन्। अपि च सभायां तासां ब्रह्मवादिनीनां नारीणां योगदानमासीत्, अपरं तु इतरस्त्रीणां कृते अधिकारः नासीत्। यथा - ''तस्मात् पुमांसः सभां यान्ति, न स्त्रियः'' इति [१७२]। अत्रोदाहरणात् स्पष्टं भवति यत् तस्मिन् समये स्त्रियः अपि शिक्षां प्राप्नुवन्ति स्म। याज्ञबल्क्यस्य पत्नी मैत्रेयी ब्रह्मविद्यानिष्णाता तथा अपरा पत्नी कात्यायनी गृहस्थधर्मावलम्बिनी आसीत्। विदुषी मैत्रेयी याज्ञबल्क्येन साकं ब्रह्मसम्बन्द्धान् अनेकान् प्रश्नान् पृष्टवती। एकस्मिन् विषये

कण्वस्तथा माध्यन्दिनशाखाया: बृहदारण्यकोपनिषदि आख्यायिकारूपेण वर्णितमस्ति। गार्गी तथा याज्ञबल्क्यसम्वाद: बृहदारण्यकोपनिषदि तृतीयाध्यायस्य अष्टमब्राह्मणे दृश्यते।

बृहदारण्यकोपनिषदि तथा छान्दग्योपनिषदि स्त्रिय: यज्ञस्य पञ्चमाग्निरिति कथिता:। तस्मिन् समये पत्यु: इच्छानुसारं पत्नी ब्रह्मचर्यव्रतपालनपूर्वकं तेन साकं जीवनमतिवाहितं करोति स्म।

केनोपनिषदि चतुर्थखण्डे लिखितमस्ति यत् इन्द्रस्य समीपे यज्ञ: लुप्तो भूत्वा आकाशे हैमवती - उमारूपेणाविर्बभूव। तदा इन्द्रस्य यज्ञविषयिणी जिज्ञासा यथा - "सा ब्रह्मेति होवाच, ब्रह्मणो वा एतद्विजये महीयध्वमिति।"[१७३] अत्र यज्ञ: ब्रह्मस्वरुप:। केनोपनिषदि उमा शिक्षितानारीरूपेण प्राप्यते।[१७४] छान्दोग्योपनिषदि सत्यकाम: जावालिविवरणं दृश्यते। एकदा ब्रह्मचर्यकामी सत्यकाम: स्वमातरमपृच्छत् - भवति ! मम गोत्र: क: ? तत्र माता वदति - पुत्र ! अहं न जानामि तव गोत्रम्। युवावस्थासमये बहूनां जनानां सेवया त्वां प्राप्तवान्। अत: भवत: नाम जाबाल: सत्यकाम: इति गुरो: सन्निकटे कथयतु। अनेन स्पष्टं भवति यत् उपनिषत्काले स्वैरिण्य: स्त्रिय: आसन्।[१७५] परन्तु अन्यत्र दृश्यते कैकेयनरेश: अश्वपति: वदति - "मम जनपदे कोऽपि चोर:, कृपण:, मद्यप:, अनहिताग्नि:, अविद्वान् वा नास्ति। अत्र व्यभिचारिणी कुत आगता ?" न मे स्तेनो जनपदे न कदर्यो न मद्यप:। नानाहिताग्निर्नाविद्वान्न स्वैरी स्वैरिणी कुत:।। इति।[१७६]

प्रश्नोपनिषदि सृष्टे: प्रारम्भे प्रजोत्पत्ति: कथं जातेति कबन्धी प्रश्नं पृच्छति। तत्र ऋषि: कथयति - सचराचरजगति प्रजापाति: प्रजोत्पादनाय मनसि कामनां निधाय तप: कृतवान्। तत: मिथुनं सञ्जातम्। रयिप्राणयो: मिलितरूपमेव मिथनम्। प्राण: भोक्तृशक्ति:, तथा रयि भोग्यशक्ति:। अर्थात् रूपशक्ति: प्राण:, कर्त्तृत्वशक्ति: तथा रयि: कर्मशक्ति: भवति। ऋषि: कथयति दिवस: प्राण:, रात्रि: रयीति। अत: कथ्यते दिवा सम्भोगे दम्पत्यो: प्राण: मलीनो भवति। रात्रौ तु सम्भोगे ब्रह्मस्वरूपो भवति। यथा-

अहोरात्रो वै प्रजापतिस्तस्याहरेव प्राणो रात्रिरेव रयि:। प्राणं वा एते प्रस्कन्दन्ति ये देवा रत्या संयुज्यन्ते ब्रह्मचर्यमेव तद्यद्रात्रौ रत्या संयुज्यन्ते। इति।[१७७]

दार्शनिकविवेचनानुसारं रयि - प्राणयो:, स्त्रीपुरुषत्वेन वर्णनं स्पष्टतया प्रतिभाति यत् स्त्री भोग्यारूपा, पुरुष: भोक्तृरूप:। एकादशोपनिषत्सु प्रमाणितं भवति यत् तत्कालीनयुगे नार्य: भार्या तथा मातारूपेण पूज्या आसन्। मातु: स्थानं सर्वोपरि आसीत्।

वैदिकयुगे नारीणां कर्त्तव्यम्

वैदिकसाहित्यस्यानुशीलनेन ज्ञायते यत् वैदिककाले स्त्रीणां कर्त्तव्यमतीव गौरवास्पदमासीत्। स्त्री गृहिणी, गृहस्वामिनी, सहधर्मिणी - इत्यादिभिः विशेषणैः सम्बोध्यते स्म। पत्नीरूपेण सा गृहस्वामिनीपदमलञ्चकार। श्वशूरश्वश्र्वादिषु तस्या अधिकारः मन्यते स्म। तदुक्तं ऋग्वेदे -

साम्राज्ञी श्वशुरे भव साम्रज्ञी श्वश्र्वां भव।

ननान्दरि साम्राज्ञी भव सम्राज्ञी अधिदेवृषु॥[१७८] **इति।**

किञ्च नारीणां कर्त्तव्यविषये संस्कृतसाहित्ये स्पष्टीकृतं यथा -

'न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते'' इति। तत्रापि स्त्रीणामाचारशुद्धिः, जागरुकत्वम्, सुसन्ततियुक्तत्वम् चाभिष्यते। सुसन्तानोत्पत्या राष्ट्रहितसम्पादनमपि स्त्रीणां[१७९] परमं कर्त्तव्यम्। अतः दृश्यते अथर्ववेदे -

इदं राष्ट्रं पिपृहि सौभगाय विश्व एनमनु मदन्तुं देवाः।[१८०] इति।

विष्णुधर्मसूत्रस्य पञ्चविंशतितमेऽध्याये स्त्रीणां कर्त्तव्यमेवमुदीरितम्। यथा -

१. भर्त्तुः समानव्रतचारित्वम्

२. श्वश्रु-श्वशुर-गुरु-देवता-अतिथिपूजनम्

३. स्वसंस्कृतौ उपस्कर्त्ता

४. अमुक्तहस्तता

५. सुगुप्तभाण्डता

६. मूलक्रियास्वनभिरतिः

७. मङ्गलाचारतत्परता

८. भर्त्तरि प्रवसितेऽप्रतिकर्मक्रिया

९. परगृहेष्वनभिगमनम्

१०. द्वारदेशगवाक्षेष्वनवस्थानम्

११. सर्वकर्मस्वतन्त्रता

पत्युः सहभागिता तथा पारिवारिकसमृद्धये नारीणां कर्त्तव्यम् -

वैदिकसंहितायां पुरुषः समशक्तेः, नारी विषमशक्तेः प्रतीकत्वेन च ज्ञायते स्म। नारीपुरुषौ परस्परं जीवनं सफलीकृतवन्तौ। पति-पत्नीरूपेणोभयोः स्नेहबन्धनं पवित्रमासीत्। पतिः धर्मकार्येषु दक्षः, विद्वान्, सदाचारी, कर्त्तव्यपरायणश्चासीत्। पत्नी प्रतिव्रतायाः मातृत्वशक्तेः देवीस्वरूपायाश्च मूर्त्तिः। इयं तु साक्षात्ब्रह्मवादिनीरूपेण वैदिकवाङ्मये वर्णिता। अस्माकं मानवशरीरस्य भागद्वयं परिकल्प्य दक्षिणभागः पुरुषस्य वामभागश्च नार्याः इति विचार्यते। सौरशक्तेः प्रतीकरूपेणोभयोः नारीपुरुषयोः सृष्टि-उत्पादन-सञ्चालनादिषु समानाधिकारः विद्यते। तत्र साहसे उद्यमे वा यद्यपि पुरुषः श्रेष्ठ आसीत्, तथापि धैर्ये सहनशीलतायां त्यागभावनायां वा नारी अद्वितीया मन्यते स्म। बृहदारण्यकोपनिषदि वर्णितं यत् - ''सृष्टेः प्रारम्भे आत्मा एक आसीत्, तस्मादसौ एकाकी रमणार्थमसमर्थो बभूव।

अतः स्वशरीरं नारीपुरुषत्वेन द्विधा विभक्तवान्। निजसङ्कल्पानुसारं परमात्मा अर्द्धनारीश्वरः (शिवः) अभवत्'' इति। तदेवं सच्चिदानन्दः भगवान् सद्भावेन स्थितः द्रष्टत्वेन स्वानन्दानुभवेन सृष्टिप्रपञ्चं चकार। पतिपत्नीत्वेन स्थापितोऽयं सम्बन्ध आत्मनः स्थूलसूक्ष्मकारणैः त्रिविधैः शरीरैः समानः मन्यते स्म। फलतः नारी स्वकीयां भोगेच्छां सर्वेभ्यः इतरेभ्यः स्थानेभ्यः प्रत्यावर्त्य सर्वात्मना स्वपत्युः सन्निकटे केन्द्रीभूतां करोति स्म।

तदा गृहपत्नीरूपेण नारीस्वकीयं सार्वजनिकं जीवनं प्रारब्धवती। स्वकीयसेवाभावनया सा गृहत्वेन प्रथिता। गृहस्थाश्रमे प्रवेशसमये कर्त्तव्यपालनपूर्वकमादर्शगृहनिर्माणाय शुभाशीर्वचोभिः सदुपदिष्टं यत् - ''इहैव स्तं मा वियौष्टं विश्वमायुर्व्यश्नुतम्'' क्रीळन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे॥ इति।[१८१] किञ्च तत्रैव नारी स्वपत्युः कृते मङ्गलकारिणी भवितुमुपदेशः प्रदत्तः।[१८२] तत्र गृहस्थजीवनस्य सुव्यवस्थायाः सम्पूर्णं श्रेयः गृहपत्न्याः कृते भवति। संहिताकाले नार्यः स्वपत्युः कृते वस्त्राणि निर्मान्ति स्म। मातरः स्वसन्ततीनामायुषः वर्द्धनार्थं वस्त्रवयनं कुर्वन्ति स्म। तदुक्तं ''वस्त्रा पुत्राय मातरो वयन्ति''[१८३] इत्यादि। अतः संहिताकाले समाजे नारीणां महदगौरवमासीत्। यत्र पुरुषः गृहस्वामी, तत्रैव नारी गृहस्वामिनी। यत्र च पुरुषः अन्नदाता, तत्र पुनः नारी साक्षादन्नपूर्णा आसीत्। पूर्णमनोयोगेन गृहस्य समीक्षणमेव नार्याः परमकर्त्तव्यमासीदिति ज्ञायते।

उपसंहार

'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः' इति स्मृति वचनात् ज्ञायते यत् भारतीयसमाजे नारीणां स्थितिगौरवपूर्णाऽसीत्। प्रत्येकस्मिन् समाजे पुरुषाणां नारीणां च सामाजिक बन्धस्य निर्धारणं तत्र प्रचलितया संस्कृत्या एव ज्ञानं भवति। सामाजिकजीवनेषु स्त्रीपुरुषयोरधिकारः कर्त्तव्यश्च तत्रत्या संस्कृत्या एव निर्धारिता जायते। वैदिकयुगीय समाजे स्त्रियः पुरुषामिव सर्वेषु संस्कारेषु सम्मिलिता आसीदिति दृश्यते। यमोक्तवचनानुसारेण ज्ञायते यत् प्राचीनकाले मुञ्जमेखलाधारणं नारीणां नियमः आसीत्। नार्यः अपि वेदपाठाधिकारिण्यः आसन्। एताः उपवीतधारी भूत्वा गायत्रीमपि उच्चारयन्ति स्म। यथा-

पुराकाले कुमारीणां मौञ्जीबन्धनमिष्यते।
अध्यापनं च वेदानां सावित्रीवाचनं तथा ॥ इति।

विवाहसंस्कारेऽस्मिन् बहुषुस्थलेषु कन्यायाः कृते मन्त्रपठनार्थं निर्देशः दृश्यते। 'अयज्ञो वै पुरुषः योऽपत्नीकः इति कृष्णयजुर्वेदीय तैत्तिरीयब्राह्मणानुसारं वैदिकयुगे विवाहितस्त्रियं विना पुरुषः सामाजिककर्मणि अनुपयुक्तः आसीत्। तदा सर्वेषु यज्ञादि धार्मिकोत्सवेषु नार्यः स्वतन्त्ररूपेण सम्मिलिताः भवन्ति स्म। परन्तु पत्या सहैव तासामधिकारः अनिवार्यरूपेण श्रूयते। वैदिकयुगे काश्चन नार्यः साहित्यलेखिका काश्चन तु वीराङ्गनारूपाःकाश्चन् विदुषीरूपेण वर्णिताः। तदा मन्त्रद्रष्टाऋषि वत् बहव्यः मन्त्रद्रष्ट्री-ॠषिका अपि आसन्।

वैदिकयुगे यद्यपि पुत्रजन्मनः अधिकमहत्वमासीत् तथापि पुत्रीणामपि समादरः न्यूनानासीत्। पितुः सम्पत्तिषु तासामधिकारोपि आसीत्।

शिक्षाक्षेत्रेऽपि नरीणां स्थितिः समीचीनाआसीत् परन्तु सौविध्यं ब्राह्मणक्षत्रियवैश्यानां कन्याःलब्धवत्यः। तदा वेदविद्यापारङ्गता स्त्री 'पथ्यास्वस्तिः वाग्' इत्युपाधिना समलंक्रियते इति कौषीतकि-ब्राह्मणानुशीलनेन ज्ञायते।

पुनश्च वैदिकसाहित्यावलोकनेन ज्ञायते यत् बहुपत्नीविवाहप्रथायाः प्रचलनं तदा आसीत्।विधवाः स्त्रियः पत्युरनुजेन सह अथवा अन्यपुरुषेण सह विवाहं कर्त्तुं समर्थाः

आसन्। पुनश्च अपुत्रिकस्त्रीणां कृते केवलं वंशरक्षार्थम् एकमेव पुत्रोत्पादनार्थं पत्युः अनुमत्या अन्यपुरुषेण सह यौनसम्बन्धं स्थापितुं समर्थाः आसन्। तस्मिन् समये समाजे स्त्रियं विना गृहस्य कल्पना नासीत्। 'गृहिणी गृहमुच्यते' इति वचनं तदा सार्थकमासीत्' स्त्री पत्युः अर्धाङ्गिनी इति उक्तमासीत्। 'अर्धो वै एषः यत् पत्नी' इति ब्राह्मणवचनात् द्वयोः कृते समानावसरः आसीत्। तदा स्त्रीपुरुषयोर्मध्ये कोऽपि भेदो न दृश्यते स्म। द्वौ एव गृहे माङ्गलिककार्येषु सहभागित्वेन समर्थौ आस्ताम्। शतपथब्राह्मणे पत्न्या एव गृहस्य प्रतिष्ठा इत्युच्यते। यथा-गृहा वै पत्न्ये प्रतिष्ठाः। इति। अथर्ववेदे श्रूयते यत् पत्नीः गृहकार्ये स्वपतिं परामर्शं ददाति, येन पुरुषः कुमार्गं परित्यजति। ताः स्त्रियः 'पध्रुवा' दृढसकल्पयुक्ता 'पुरन्धि' समाजस्य नेत्री, 'प्रतरणी' जीवनस्य त्राणकर्त्री, 'शिवा' कल्याणकारिणी, 'सुमङ्गली' मङ्गलकारिण्यादि विशेषणैः आद्रियते। अतएव वैदिकसाहित्ये स्त्रियः सम्मानार्हा पूज्या, शक्तिस्वरूपा, मान्या, गृहस्थरूपा, गृहस्वामिनी, समाजस्य पथप्रदर्शिका, वीराङ्गना, मन्त्रद्रष्टयः, सुशिक्षिताः, संस्कारिताः, दार्शनिकाः, धर्मरक्षिकाः आसन् तत्रतु न सन्देहः। वैदिकयुगः स्त्रीणां कृते सुवर्णकालः आसीत्। शिक्षायाः समानावसरः आसीत्। नारी सहायतां विना जगत् शून्यं भविष्यति इति मनसि निधाय मन्त्रद्रष्टाऋषयः नारीणां कृते समानावसरः प्रदत्तः आसीत्। शतपथब्राह्मणे श्रूयते यथा-

वृषा वा ऋषभो योषा सुब्रह्मण्या तन्मिथुनं तस्य मिथुनस्य प्रजात्या। योषा वाऽआपो वृषाग्निर्गृहा वै गार्हपत्यस्तद् गृहेष्वेवैतन्मिथुनं प्रजननं क्रियते। शत (१/१/१) व्यन्त्विति वै योषा वेत्विति वृषा मिथुनमेवैतत् प्रजननं क्रियते। योषा वै वेदिर्वृषा वेदो मिथुनाय वै वेदः क्रियतेऽथ यदेनेन यज्ञ उपालभ्यते मिथुनमेवै तत्प्रजननं क्रियते। वृषा वै सोमो योषा पत्न्येष वा। योषा वै सरस्वती वृषा पूषा। स्रुचो योषा वै स्रुग् वृषा। योषा परास्या रेतो वाजिनम्। वृषा वै व्रतं योषा दीक्षा। इति।

अतः उपरोक्तवचनानुसारं ज्ञायते यत्-वैदिककाले नरस्य सहभागिनी, सहधर्मिणी सहकर्मिणी, अर्धाङ्गिनीरूपेण प्रतिष्ठिता आसीदितिमेव।

*****

सन्दर्भाः

(१) यजुर्वेद, ३४/४९

(२) मुण्डकोपदिषद्, ३/२/५

(३) निरुक्त, १/१९

(४) बृहद्देवता, २४/८४-८६

(५) बृ. उ., ३/६/१

(६) ऐ. ब्रा., ३/४/९

(७) ऋक्., १०/८५/४६

(८) वृहद्देवता, २/६६/८३

(९) ऋ. वे., १०/१८९

(१०) ऐ. ब्रा., ५/४/४

(११) सा. ताण्ड. महा., ९/८/७

(१२) ऋ. वे., १०/१५१/१

(१३) ऋ. वे., १/१७९

(१४) ऋ. वे.,१०/१४५

(१५) ऋ. वे., १०/१०७

(१६) ऋ. वे., ८/१/३४

(१७) श. ब्रा., ३/३/४/१८

(१८) जै. ब्रा. २/७९

(१९) षड्. ब्रा., १/१/२०

(२०) रामा., ७/३०/२१-२७

(२१) श. ब्रा., ७/४/२/७

(२२) निरुक्त, ४/२२

(२३) रामायण, १/१८/११

(२४) तै. ब्रा., १/१/९१/१-२

(२५) वा. सं. ३/५७

(२६) तै. ब्रा., १/५/९/१

(२७) पौराणिकसन्दर्भकोष एन्. पी. कुटनपिल्ले, पृ. १४८

(२८) ऐ. ब्रा. २/४

(२९) ताण्ड. म. ब्रा., १३/६/९

(३०) जै. ब्रा., १/१६/१

(३१) श. ब्रा., १/१/४/१४-१८

(३२) तै. ब्रा., १/१/४/४

(३३) श. ब्रा., १/८/१/२६

(३४) श. ब्रा., १/८/१/८

(३५) श.ब्रा., ३/३/४/८

(३६) षड्. ब्रा., १/१/१६

(३७) महा. भा., १५/६७-६८

(३८) प्राचीनचरित्रकोष, पृ. ६६३

(३९) ऐ. ब्रा., ७/३५/१

(४०) श.ब्रा., ४/१/५/१-१८

(४१) श.ब्रा., ४/१/५/११

(४२) रघुवंश, १/८८

(४३) के. सि. माक्डोनाल्ड, (ऋ. व., ५/२८)

(४४) अथर्व., १४/२/७५

(४५) ऋ. वे., १/१२३/२

(४६) निरुक्त, ४/१५

(४७) प्राचीनभारतीय शिक्षणपद्धतिः, पृ. १५७

(४८) बृ.उ., २/४/५

(४९) बृ. उ., ३/६/१

(५०) भागवत पु., ४/१/६४

(५१) The Position of women, A.S. Altekar, P. 12

(५२) बृ. उ., ४/४/१५

(५३) मनु., २/२६

(५४) याज्ञ. स्मृति. ११३

(५५) पु.मी. ६/२/२

(५६) पु. तन्त्र. (वी.मि. परिभाषा) पृ. ४०

(५७) Education in ancient India, A. S. Altekar, P. 220

(५८) वा. का. सू., १/३/१६

(५९) गाथासप्तसती, १/५७/९०, २/६३, १/९१, २/२७, १/७०, १/५६, ४४च

(६०) भाग. पु. ४/७

(६१) छा. उ. २/४२

(६२) गीता., १/४१

(६३) मनु., १/३२

(६४) तत्रैव, ३/५६

(६५) अथर्व., ११/५

(६६) मनु., २/६६-६७, व्र.क., पृ. ९६, सं.प्र., पृ. १९४, सं.कौ., पृ.-११३

(६७) शल्यः, ४८, १०-११

(६८) डॉ. राजवली पाण्डेय, हिन्दूसंस्कार, पृ. ९४

(६९) महाभारतम्, १/१६६/५२

(७०) मा.गृ.सू., १/१९/४

(७१) अथर्व., ६/१४०

(७२) आश्व. गृ. सूत्र., १/१७-१८

(७३) वी.मि.सं.प्र., पृ. ३१७

(७४) निर्णयसिन्धुः- तृतीयपूर्वं, पृ. १९०

(७५) गौतमधर्मसूत्रम् - १०/५१

(७६) वशिष्ठधर्मसूत्रम्, ४/३

(७७) अथर्व. ११/५/१८

(७८) संस्कारमयुखः, पृ. ४०२, स्मृतिचन्द्रिका, भा. १, पृ. २४

(७९) गो. गृ. सू., २/१/१९

(८०) वी.मि.सं.प्र., पृ. ४०२-४०३, स्मृतिचन्द्रिका, भा-१

(८१) मनुः. २/६७

(८२) वा. रा., २/१०/१५

(८३) तत्रैव, ४/१४/४९

(८४) आश्वा. गृ. सू., ३/८/२

(८५) वी. मि.सं.प्र., पृ. ४०४

(८६) तै. ब्रा., २/२/२/६

(८७) पाणिनिः, ४/१/१३

(८८) तै. ब्रा., ३/३/३/५

(८९) मेधातिथिः, २/६७

(९०) ऋ. वे., १०/८५/४७, पा. गृ. सू., १/४/१४, शा.गृ.सू., १/१२/५

(९१) म. ब्रा., २/१/८

(९२) मनुः, ६/१६७

(९३) तत्रैव, ६/१६८

(९४) म. भा. स्त्रीपर्व. २३/४१-४२

(९५) तत्रैव, २७/२८

(९६) महा. भा. शान्ति, ४२/३-४

(९७) ऋ. वे, १/८९/१०

(९८) ऋ. वे, १०/३६/३

(९९) ऋ. वे, ५/६२/८

(१००) ऋ. वे, ४/५७/६-७

(१०१) महाभाष्यम्, ४/४/१

(१०२) निरुक्त्, ५/१/३

(१०३) ऋ.वे.,७/२०/५, ७/५५/८, १०/१८/७, १०/८६/१०-११

(१०४) पा. गृ. सू.,१/६/२, १४/२/६३

(१०५) अथर्व., ३/१२/८, ११/१/१३ - १४, ११/१/२३, १४/२/२०

(१०६) सायणभाष्यम् - तै. आ., ४/२/१

(१०७) अथर्वसं., ७/३८/४

(१०८) मैत्रायणी सं., ७/३८/४

(१०९) अथर्व., ६/१३८/२

(११०) निरुक्तम्, ३/२१/२

(१११) तत्रैव, ३/१५/१

(११२) ऋ. वे., ३/५३/६

(११३) तत्रैव, ३/५३/४

(११४) ऋ. वे., १/१५/३, १/२२/१०, ५/४३/६

(११५) तत्रैव, ५/४६/८

(११६) मैत्रायणीसंहिता, १/६/१२

(११७) ऋ. वे., १/६६/४, २/३९/२, ३/९३/३, ५/५७/४, ६/४९/२ च

(११८) कठ. सं., १३/४

(११९) अथर्व., ३/२८

(१२०) तत्रैव, १०/९५/८

(१२१) ऋ. वे., १/९२/४

(१२२) ऋ. वे., १/१६७/३

(१२३) अथर्व., १५/२/१, वाज. स.सं. ३०/२२

(१२४) ऋ. वे., १/१२४/७

(१२५) तत्रैव, १०/७१/४

(१२६) तत्रैव, १/१६७/४

(१२७) तत्रैव, १/१२४/८

(१२८) ऋ.वे., १/११६/१३, १/११७/२४, ६/६२/७

(१२९) तत्रैव, ३/२९/३, वाज. सं. २४/१४, काठ. सं. ३३/१

(१३०) वाज. सं. ३०/१५

(१३१) तत्रैव, ३०/१५

(१३२) अथर्व, १४/१/३६

(१३३) ऋ. वे., १०/८५/२२, अथर्व, ५/२२/७, तै. सं., ४/२/५
मै.सं., २/७/१२, का. सं., १६/१२, वा. सं., १२/७१

(१३४) ऋ. वे., ४/२८//४, तै.सं., ७/५/१०, अथर्व. १२/४/९

(१३५) वा.सं., २३/८

(१३६) ऋ. वे., ९/५/६

(१३७) तत्रैव, ९/६/२१

(१३८) यजु:, २०/४

(१३९) ऋ. वे., ५/४७/६

(१४०) यजु:, ३०/९

(१४१) निरुक्तम्, ६/५

(१४२) ऋ. वे., १०/११४/३

(१४३) तत्रैव, १०/८५/२६

(१४४) ऋ. वे., १/१२३/१०

(१४५) शब्दानुशासनम्, ५/१/१०३

(१४६) "The son is a boat of salvation where the daughter is a misery to the parents"-Whomen in the vedik age, P. 71

(१४७) शत. ब्रा., ३/३/१/२

(१४८) तत्रैव, १४/३/१/३५

(१४९) निरुक्तम्, ४/४/४

(१५०) ऋक् सं., ८/१०१/१५, १०/१७/११, तथा अ. सं., २/१५/२, ६/१००/३, ७/१२/१

(१५१) ऋक् सं, ९/१२/३

(१५२) बृ. उ., १/४/३

(१५३) महाभारतम्, शान्तिपर्व - श्लो., २९५

(१५४) ऐत. ब्रा., ५/२/१/१०

(१५५) ऋ. सं., ७/८/१/४

(१५६) शत. ब्रा., ७/१/१/४३

(१५७) मनु. २/१४५

(१५८) ऋ. सं. १०/१६/११

(१५९) तत्रैव, ५/४/२/२

(१६०) तत्रैव, १/२४/१, १/२४/२, १/१४/७

(१६१) अथर्व., २/३६/३

(१६२) अथर्व. सं., ३/२३/३

(१६३) ऐत उप. , २/१ तथा ऐतरेय आरण्यकम् - २/५/१

(१६४) ऐतरेय आरण्यकम् - २/५/ १

(१६५) ऐतरेयोपनिषद्- ११/ १

(१६६) तैत्तरेयारण्यकम् - ६/११, ११/२, १०/१

(१६७) कठ. १/२५

(१६८) तत्रैव, १/२६

(१६९) श्वेताश्वतरोपनिषद्, ४/३

(१७०) तत्रैव, ४/१०

(१७१) तत्रैव, १/१०

(१७२) मै. सं., ४/७/४

(१७३) छा.उ., ५/८/२-१

(१७४) केन. उ., ३/१२

(१७५) छान्दोग्य. उ., ४/४९

(१७६) तत्रैव, ५/११/५

(१७७) प्रश्न. उ., १/१३

(१७८) ऋग्वेद, १०/८५/४६

(१७९) अथर्व., ६/१२२/५

(१८०) तत्रैव, ७/३५/१

(१८१) ऋ. वे., १०/८५/४२

(१८२) तत्रैव, १०/८५/४४

(१८३) तत्रैव, ५/४७/६

सहायकग्रन्थसूची

१. ऋग्वेदसंहिता - वैदिक संशोधनमंडल, पूणे, १९९५

२. अथर्ववेदसंहिता (सायणभाष्योपेता) - पण्डुरङ्गसुनुशङ्करसम्पादिता, मुम्बई।

३. शुक्लयजुर्वेदसंहिता (महीधरभाष्योपेता) - चौखम्बा सुरभारती प्रकाशन, वाराणसी।

४. कृष्णयजुर्वेदतैत्तिरीयसंहिता (सायणभाष्योपेता) - आनन्दाश्रमप्रेस, पूणे।

५. उपनिषत्संग्रहः - मोतीलाल बनारसीदास, दिल्ली, १९७०

६. शतपथब्राह्मणम् - चौखम्बा सुरभारती प्रकाशन, वाराणसी।

७. भारतीय संस्कृति में नारी - परिमल पब्लिकेसन्स्, दिल्ली, १९९१

८. ब्राह्मण ग्रन्थों में नारी - जे.पी. पब्लिशिंग हाउस्, दिल्ली, २०००

९. मनुस्मृतिः - सम्पादकः-हरगोविन्दशास्त्री, चौखम्भा संस्कृत संस्थान, वाराणसी।

१०. हिन्दुसंस्कार - चौखम्बा विद्याभवन, वाराणसी, १९७८

११. निरुक्तम् - मेहरचन्द लछमनदास पब्लिकेशन्स्, नई दिल्ली

१२. वैदिक साहित्य और संस्कृति - आचार्य बलदेव उपाध्याय, शारदा मन्दिरम्, वाराणसी, १९६७

१३. बृहद्देवता - चौखम्बा सुरभारती प्रकाशन, वाराणसी।

१४. महाभारतम् - गीताप्रेस, गोरखपुर, उत्तरप्रदेश

१५. मीमांसादर्शनम् - सं. श्रीरामशर्मा आचार्यः, संस्कृति संस्थान, बरेली, १९८०

१६. गौतमधर्मसूत्रम् - डॉ. नरेन्द्रकुमार, विद्यानिधि प्रकाशन, दिल्ली-२००७

१७. वैदिककालीन भारतीय इतिहास - डॉ. कैलाशचन्द्र सिंहल, आधुनिक प्रकाशन, दिल्ली, २००३

१८. याज्ञवल्क्यस्मृतिः (मिताक्षरा-वीरमित्रोदयटीकोपेता) - चौखम्बा संस्कृत सीरिज्, वाराणसी, १९७२

१९. बौद्धायनधर्मसूत्रम् - चौखम्बा संस्कृत सीरिज्, वाराणसी, १९७२

२०. पारस्करगृह्यसूत्रम् (हरिहरभाष्योपतम्) - चौखम्बा सुरभारती प्रकाशन, वाराणसी।
२१. महाभाष्यम् - - चौखम्बा सुरभारती प्रकाशन, वाराणसी।
२२. स्मृतीनां समुच्चय: - आनन्दाश्रम प्रेस्, पूणे, १९०५
२३. आश्वलायनगृह्यसूत्रम् - चौखम्बा सुरभारती प्रकाशन, वाराणसी।
२४. बृहदारण्यकोपनिषद् - मोतीलाल बनारसीदास, नई दिल्ली
२५. वाल्मीकिरामायणम् - गीताप्रेस, गोरखपुर, उत्तरप्रदेश
२६. वीरमित्रोदयसंस्कारप्रकाश: - चौखम्बा संस्कृत सीरिज्, वाराणसी, १९३०
२७. वेदकालीन नारीशिक्षा - ओरियन्टाल बुकसेण्टर, दिल्ली, १९९८
२८. वेदकालीन समाज - डॉ. शिवदत्त ज्ञानी, चौखम्बा विद्याभवन, वाराणसी, १९६७
२९. कल्याण (नारी अङ्क) - गीताप्रेस, गोरखपुर, उत्तरप्रदेश
३०. वैदिक संहिताओं में नारी, डॉ. मालती शर्मा, वाराणसी
३१. Position of Women in India - Queen Barawda and S.N. Mitra, Longmens Green and Company, 1911.
32. History of Dharamashastra - P.V. Kane, Pune, 19230-37.
33. Dr. A.S. Altekar - Education in Anceint India, Raja printing press, Varanasi, 1951.

साङ्केतिकसूची

ऋ. वे.	-	ऋग्वेदः
ऐ. ब्रा.	-	ऐतरेयब्राह्मणम्
श.ब्रा.	-	शतपथब्राह्मणम्
जै. ब्रा.	-	जैमिनीयब्राह्मणम्
षड्. ब्रा.	-	षड्विंशब्राह्मणम्
वा. रामा.	-	वाल्मिकरामायणम्
तै. ब्रा.	-	तैत्तिरीयब्राह्मणम्
वा. सं.	-	वाजसनेयीसंहिता
ताण्ड्य. म. ब्रा.	-	ताण्डयमहाब्राह्मणम्
महा. भा.	-	महाभारतम्
बृ. उ.	-	बृहदारण्यकोपनिषद्
भाग. पु.	-	भागवतपुराणम्
मनु.	-	मनुस्मृतिः
याज्ञ. स्मृति	-	याज्ञवल्क्यस्मृतिः
पू. मी.	-	पूर्वमीमांसा
छा. उ.	-	छान्दोग्योपनिषद्
अथर्व.	-	अथर्ववेदः
मा. गृ. सू.	-	मानवगृह्यसूत्रम्
आश्वगृ. सू.	-	आश्वलायनगृह्यसूत्रम्
गो. गृ. सू.	-	गोभिलगृह्यसूत्रम्
वी. मि. सं. प्र.	-	वीरमित्रदयसंस्कारप्रकाशः
पा. गृ. सू.	-	पारस्करगृह्यसूत्रम्
मैत्रायणी सं.	-	मैत्रायणी संहिता
कठ. सं.	-	कठसंहिता
प्रश्न. उ.	-	प्रश्नोपनिषद्
केन. उ.	-	केनोपनिषद्

ISBN - 13 - 078-81-925721-7-8

Shree Somnath Sanskrit University - Veraval.
Veraval- 362 266, Dist : Junagadh (Guj.) India
Phone : 02876 - 244528, 29, 32 Fax : 244417
e-mail : sssu.veraval@gmail.com,
www.shreesomnathsanskrituniversity.info